॥महाभाष्यानुसारिवाक्यपदीयव्याख्याराजकृतप्र॰ ७॥

॥श्रीगोपीजनवल्लभो विजयतेतराम्॥ ॥ॐ नमः श्रीभगवत्याणिनिकात्यायनपतञ्जलिभ्यः॥ ॥यस्मिन्नूसमुखतांप्रयातिसकलंकोप्यंतरुद्भासतेनेदं॥
यान्महिमामनस्यभिनवः पुंसः प्रकाशात्मनः॥तृप्तिर्यत्परमांतनोतिविषयास्वादंविनाशाश्वतीध्यमानंदसुधामयोर्जितवपुःसत्त्वातिभंसस्तुमः॥१॥का
एऽद्येयधातुनिसिद्धांतार्थसत्त्वतः॥प्रबंधेविहितोस्माभिरागमार्थानुसारिभिः॥२॥तच्छेषभूतेकाण्डेस्मिन्सप्रयत्नेस्वरूपतः॥श्लोकार्थद्योतनपरः प्र
काशोयंविधीयते॥३॥इहपदार्थाष्टकविचारपरत्वाद्वाक्यपदीयस्यप्रथमकाण्डेनप्रयोजनादिमदार्थेनिरूपितेनंतरकाण्डोपपादितोपपत्तिभिर्वाक्य
तदर्थयोरन्वाख्येयस्थितनरूपणयोःपदार्थयोर्निरूपितयोःतत्त्वाप्युपकारकापोद्धारस्वरूपःपदविचारःप्रक्रम्यते॥तत्रनियतविकल्पोयथाभिप्रायमपोद्धार
स्तियथासंभवपदभेदानुपदिशति॥ ॥द्विधाकैश्चित्पदंभिन्नंचतुर्धापिचधापिवा॥अपोद्धृत्यैववाक्येभ्यःप्रकृतिप्रत्ययादिवत्॥४॥ ॥वाक्यस्येवनिरंश
स्यवाचकत्वादतरायदप्रतिपत्तिर्विभ्रमइतिकिमसत्यपदव्युत्पादनेनेत्याशंक्यापोद्धृत्यैववाक्येभ्यइत्याह॥अपोद्धृत्यकल्पनाबुद्ध्याप्यखण्डपदनिष्पन्न
अखण्डवाक्यव्युत्पन्नावुपायः॥यदव्युत्पत्तिर्वाक्यवादिना॥अखण्डपदव्युत्पन्नाविवपरिकल्पितरूपप्रकृतिप्रत्ययागमादेशादिव्युत्पत्तिःपदवादि
नां॥आनंत्याद्धिवाक्यानांस्वारस्येनाशक्याव्युत्पत्तिःकर्तुमितिसदृशपदद्वारकंतदुपपत्तिरित्यर्थः॥उभयोरपिचायोद्धृतस्यासत्यत्वंसमानं॥तथाहि॥अ
नियतानुगृहीतकेयथार्थकल्पितान्वयव्यतिरेकनिबन्धनोवाक्यवादिनांयदपोद्धारः॥एवंपदवादिनांशास्त्रेणान्वयव्यतिरेकनिमित्तार्थापोद्धारवशः
प्रकृतिप्रत्ययापोद्धारः॥यदाहवाक्यकारः॥सिद्धत्वन्वयव्यतिरेकाभ्यामिति॥तत्रभिन्नत्वसामान्यंद्विधेत्यादिकोविशेषइतिविक्षार्थेक्षप्रत्ययोपपत्तिः
॥प्रकाशोहिविक्षार्थः॥सत्त्वसामान्यस्यभेदकोविशेषः॥सत्त्वसादृश्यमेवसर्वत्रप्रकारः॥कैश्चिद्धिद्यंतइत्येकीयंमतम्॥कैश्चिद्धितिवचनाद्भेदेपितुप्रका
रत्वा॥कैश्चिदभ्युपगम्यतइतिचोक्तं॥यदिचात्रबुद्धिरूपप्रकल्पितसादृश्यमेवविक्षार्थः॥ज्ञानप्रतिबिंबितंस्वंबाह्यादभ्युपगम्यानुकारित्वेनसादृश्यं

सर्वत्रप्रकारार्थःसकल्पितसदृशस्याबाह्यस्यानवद्यनाद्वाक्याच्चायोद्धियमाणस्यपदस्यवाक्यार्थांतरापरिकल्पनयाथवतएवायोद्धारोयुक्तः॥अथापो
द्धारएवहिपदापोद्धारस्यनिमित्तंअनिमित्तेहितस्मिन्नसापोद्धारस्यापिप्रसंगात्तेषामपिव्युत्पाद्यतास्यात्॥वाक्यार्थस्थितलक्षणोनिरंशःकारको
क्तलीनशरीरक्रियास्वभावःतत्रचांशांशकल्पनयापोद्धारेकारकात्मक्रियात्माचविभागार्हइतिसिद्धसाध्यलक्षणांशद्वयविषयःपदापोद्धारोहि
विधुः॥नामाख्यातरूपःप्राथमकल्पिकःशक्तिशक्तिमतोरभेदात्कारकात्मासिद्धरूपोंशः॥यद्यपिचनामपदानांप्रत्ययार्थस्यसंख्यादेःशाब्दप्राधा
न्यंतथाप्यर्थतःप्राधान्यंतिपदिकार्थस्यजात्याकृतेरेवद्रव्यस्यैवप्राधान्यंसिद्धरूपस्यसंख्याकारकशक्तीनांतदाश्रयत्वादप्रयोक्तृत्वनामाख्या
तयोर्विशेषत्वान्निपातोपसर्गकर्मप्रवचनीयलक्षणःपदभेदोनभवतीतिथाहि॥सिद्धार्थाभिधायिनामपदमितिनदर्थगतविशेषद्योतयन्निपा
तस्तत्रैवांतर्भवति॥सिद्धार्थसाक्षाद्भिदधातुतत्तद्विशेषवाप्रकाशयतु॥सिद्धार्थासाक्षाद्भिदधनेयतोभेदः॥स्वरादयस्तुकेचित्सत्त्वप्रधाना
एवेतिनेपिनामपदमेवायेतुहिरुगादयःपृथक्क्रियाप्रधानास्तेषामाख्यातेतर्भविः॥नहितिङंतमेवाख्यातंक्रियाप्रधानस्यसर्वस्यैवतत्रक्षणा॥
त्॥अतएवोपसर्गकर्मप्रवचनीयपदान्याख्यातपदमेवासाध्यार्थविशेषद्योतनात्॥एवंनिपातोपितङतभेदांतरविवक्षायातुनिपातो
पसर्गयोरपिकैश्चित्पृथक्करणम्॥तथाहि॥अस्त्येवायोद्धारेर्थमात्राद्विशेषोनयोः॥नह्येतोसाक्षादर्थंवदतः॥अपितुतङतविशेषद्योतका
वितिवाचकाभ्यांनामाख्याताभ्यांप्रविभक्तोसिद्धसाध्यार्थविषयविशेषद्योतकत्वान्निपातानांसाध्येकनियतत्वाच्चोपसर्गाणांपरस्परतोभेदः॥
कर्मप्रवचनीयास्तुक्रियाविशेषोपजनितसंबंधवच्छेदहेतवइतिसंबंधविशेषद्योतनद्वारेणक्रियाविशेषप्रकाशनाउपसर्गेष्वेवांतर्भवतीति
चतुर्धैवकैश्चित्पदंभिन्नंसाक्षात्क्रियाविशेषप्रकाशनाभावान्नदशपंचमंपदमितिकैश्चित्॥तथाहि॥कर्मप्रोक्तवतःकर्मप्रवचनीयाइतिस्मृतिः

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

क्रांतक्रियाख्यातलक्षणास्यव्यापारस्यात्रसंभवोनतुवर्त्तमानस्येत्युपसर्गेभ्योभेदः। क्रियागतविशेषद्योतनपूर्वकोहिसंबंधावच्छेदनमत्रवर्त्तमान
मुतथाहि।सर्वःसंबंधःक्रियाऽनंउपकारक्रियोचितत्वात्तस्याक्रियामंतरेणाउपकाराभावात्।तत्रक्वचित्क्रियाशब्दःश्रूयतेक्वचिन्नश्रूयते।तत्र।
श्रोतएवसंबंधविशेषावसायः।तद्यथामातुःस्मरतिमातुःस्मृतंसर्पिर्भोजनीतइत्यादौक्रियाहिस्वभावादेवक्रियांतरव्यवधानमंतरेणाइयेः
संयुज्यते।यस्मान्मातापितृविषयेप्रवर्त्तते।वर्तिष्ठतेवात्तस्मान्मातापितृसंबंधीत्स्मरणामितिक्रियाकारकभावपूर्वकएवायमपिसंबंधइति।
वर्णयंतिअश्रुतेतुक्रियापदेइयंगतिःक्वचित्संबंधस्वरूपमहिम्नैवक्रियायेरुसिद्धेःप्रतिनियतक्रियाकारकभावपूर्वकत्वशेषसंबंधस्यविनै
वकर्मप्रवचनीयमवगम्यते।तद्यथाउपगोरपत्यंइत्यस्यशाखेत्यादावपत्यवत्संबंधेऽनिक्रियानिमित्तोवयवावयविसंबंधश्चस्थितिक्रियानि
मित्तइत्यादिक्वचित्तुसंबंधनाऽतिनियतक्रियापूर्वकत्वावधारणेनास्तिसामर्थ्यात्तद्यथा।राज्ञःपुरुषइत्यत्रस्वस्वामिभावोभरणाद्यनेक
क्रियानिमित्तइत्येवावगम्यते।क्रियाविशेषोनावधार्यतेतन्निमित्तभूतःतथाचभाष्यम्।यदेतत्स्वंनामचतुर्भिःप्रकारैर्भवति।भरणाद्पकर्मह
रणाक्रयणाद्याच्चयेतिदानादीनात्वनन्यतमाविनाभावाक्रियानुमीयतएवाक्वचित्त्वविनाभाविनीक्रियापिनप्रतीयतेतथाचैवंजातीयके।
विषयेकर्मप्रवचनीयोनियतविशिष्टंक्रियाकृतत्वंसंबंधस्यविशेषमवगमयतिातदुक्तम्।ज्ञानयित्वाक्रियांकांचित्संबंधेविनिवर्त्तते।श्रूय।
माणेक्रियाशब्देसंबंधोह्यायतेक्वचित्।।स्वोपज्ञातःसंबंधेविनिवर्त्तनेक्रियापदेकर्मप्रवचनीयेनतत्रतत्रनियम्यतइति।नियमस्तस्यनिय
तक्रियाजनितत्वं।तथाहि।शाकल्यसंहितामनुश्रावर्षिहितियोयंसंहिताप्रवर्षणायोहेतुहेतुमद्भावलक्षणःसंबंधःसनियतक्रियाजनितइ
त्यनुनावेद्यते।अनुनिशम्येत्यत्रानोनिशमयतिक्रियासाहचर्यात्पलक्षणेहिसंयाग्रूपत्वात्संहितायास्तदनुमानस्यैचित्यात्।तत्रक्रियावचनत्वम

स्यान्यत्रदृष्टशब्देनकल्प्यंद्योत्यार्थनिष्ठंद्योतकत्वमितितदपिक्रियापदाप्रयोगादत्रनास्तिनचक्रियापदाद्ध्येयकत्वंयथाप्रादेशंविपरिलखतीत्यत्र
चलेखनक्रियानुपपत्तेर्भिन्नाप्रतिक्रियाद्ध्येपकत्वाकारकविभक्तिर्हियत्रप्रादेशमितिद्वितीयेतियुक्तस्तत्समुचितक्रियाद्ध्येयः।इहतुसंहितामितिशेषि
कीविभक्तिरितिकथंक्रियाद्ध्येपः।क्रियाकारकयोरेवपरस्परमाद्ध्याद्ध्येपकभावस्याविनाभावेनन्याय्यत्वात्।तद्यथा।द्विशपिंडीमित्यादौनापिसंबंध
वाचित्वमत्रामोःविभक्तेरेवतदभिधानादितिसंबंधावच्छेदस्यप्रत्यायकोनान्यःसंभवतीतिपरिशेष्यादनोरत्रसामर्थ्यमध्यवसीयते।तदुक्तंक्रिया
द्योतकोनायंसंबंधस्यनवाचकः।नापिक्रियापदाद्ध्येसंबंधस्यतुभेदकइति।भेदकोविशेषकोद्योतकइत्यर्थः।अयमत्रभावः।यदन्यथासि
द्धंतत्रानोर्व्यापारकल्पनायुक्ता।यत्पुनरन्यथार्थसामर्थ्यादिनासिध्यति।नतत्रतस्यशक्तिःकल्पयितुंपार्यतइतिपदान्तराणामर्थान्तरनिवे
शात्संबंधविशेषस्यातोनवगतस्यकर्मप्रवचनीयतासिद्धाविषयतासिद्धा।नतुयदत्राधिक्यंवाक्यार्थःसइतिक्रियाविशेषजनितत्वलक्षणः
संबंधस्यावच्छेदोवाक्यार्थःकिमितिनकथ्यते।अनोसुयश्राद्धमात्रहृत्तित्वमेवेति।अत्रोच्यते।इहाधिक्यंवाक्यार्थत्वेनोच्यमानंपदार्थइ
ष्टयातित्वेनातुस्मरणीयमानंनतुपदार्थोत्वंघनेननतत्रवाक्योपात्तस्यहिसाध्यस्यवाविशेषस्यचोपात्तैरेवसाधनैर्विशेषैरसंसर्गस्तत्राधिक्यमू
तद्यथागामुक्त्वामानयानीलोत्पलमितिच।अतएवोच्यते।आश्रयाश्रयिणोर्वाक्यानियमस्त्ववतिष्ठतइति।इत्यंचानुपात्तस्यैवपदार्थस्य
वाक्यार्थत्वंतीतिनास्तीतिनसंबंधावच्छेदोत्रायदार्थोवाक्यार्थःशक्यतेकल्पयितुमितिकर्मप्रवचनीयविषयएवायमुच्यतइति।निमि
त्तनियमःशब्दात्संबंधस्यनगृह्यते।कर्मप्रवचनीयैस्तुस्वविशेषेवरुध्यतइति।अत्रचदर्शनद्वयमुक्तंरूढेर्यौगसंबंधान्तरविलक्षणाःक
र्मप्रवचनीयेनसंबंधेवच्छिद्यते।क्रियाविशेषजनितत्वेनवेति।तत्रस्वरूपेणावच्छेदेविशेषक्रियाजनितत्वप्रतीतिःसंबंधिविशेषतापर्या

लोचनालभ्या।तथाहि।अधिब्रह्मदत्तेपंचालाइत्यत्रातस्वस्वामिभावोयंसंबंधइत्याधनावेद्यते।ब्रह्मदत्तश्चस्वामीश्वरःपंचालाश्चजनपदःस्वमितिं।तयोःसंबंधिनोःपरिपालनकराहानादिक्रियाप्रभावितएवसंबंधोन्यायइत्यवगम्यते।एवमभिमन्युरर्जुनतःप्रतीतिःप्रतिनासादृश्यलक्षणोयंसंबंधइतिद्योत्यते।सपुनःसंबंधिस्वरूपपर्यालोचनयादत्तस्यग्रहणादिक्रियाकृतइत्यवगम्यते।इत्यंचशाकल्यसंहितामनुधावर्षदित्यत्रापिहेतुफलभावोनामायंसंबंधइत्येतावत्येवायमनुर्विश्राम्यति।पाठविशेषरूपत्वात्संहितायानिशमनक्रियावगतिः।शेषश्चवर्णोनहिदेवोवर्षदितिसंबंधमहिम्नोविशिष्टक्रियाप्रभावित्वमवसीयते।केचिदियाननोरेवव्यापारइत्याहुः।स्वरूपावछेदेपिचक्रियायाःकार्यभूतसंबंधप्रयोजकयातीतकर्मत्वाकर्मघोक्तवंतइत्यर्थः।समानेत्येवंवस्तुनःक्रियाफलस्यैवसंबंधस्यप्रकाशनात्।यथातुत्वंभवतमर्तृहरेस्तत्रतत्राभिप्रायोलक्ष्यते।तथानिमित्तविशेषावछेदएवकर्मप्रवचनीयकृतइतिराघान्नाः।अधिब्रह्मदत्तेपंचालाइतिपरिपालनक्रियातिरोहितत्वस्वस्वामिभावस्याधिनावद्यते।अभिमन्युरर्जुनतःप्रतीत्यत्रपराजयकृतोनुकार्यानुकरणभावःप्रतिनाप्रकाश्यतइतिसर्वत्रयोज्यं।सुस्तुतमतिस्तुतमित्यादौतुसुःपूजायामतिरतिक्रमणेचेत्यादिनाकर्मप्रवचनीयसंज्ञाधिकारिकीस्वार्थनिरपेक्षैवोपसर्गसंज्ञाप्रवर्त्तते।बाधनायप्रवर्त्तते।यथोक्तम्।कर्मप्रवचनीयत्वंक्रियायोगेविधीयते।षत्वादिविनिवृत्त्यर्थंस्वत्यादीनांहिधर्मिणामिति।आर्थेनतुरूपेणविभागेप्रस्तुतेक्रियाविशेषावद्योतकत्वाउपसर्गपदेस्वत्यादिरंतर्भवतीतिनाव्याप्तिः।तदेवंवाक्यादयोद्रियमाणस्यपदस्यपोढारार्थविशेषाश्रयेणयथासंभवंभेदोनिरूपकवाक्यव्युत्पत्त्युपायभूतःप्रदर्शितः।अतएवस्वादिपदंवाक्यव्युत्पत्त्यनंतरंवाक्षास्त्रेसंकेतितसुबंतपदव्युत्पत्त्युपायभूतंनेहगणनार्हंप्रकृतिप्रत्ययवदितिदृष्टांतपरुनिरस्तमितिनाव्याप्तिः।यदाकिंजातावयोढारोनवाक्यादावंतरंत्यप

३

दार्थोढारेशदर्शितेतदर्थस्यार्थोद्धृतस्यसद्साध्यरूपद्वयोगनोमतभेदेनस्वरूपोपदर्शनार्थमाह॥ ॥पदार्थानामयोढारोजातिर्वाद्रव्यमेववा॥पदार्थोसिद्धशिष्टानित्यावेवोपवर्णितौ॥२॥ ॥अर्थद्वारेणापदपरित्यक्तइतिदर्शनभेदेनप्रथममयोढारपदार्थविचारः।तथाहिसर्वेषामपिशिष्टानांपदरूपाणांनामाख्यातादिस्वभावानांजातिर्वादिमतेजातिरेवार्थोनिद्रव्यमाद्रव्यवादिमतेतुद्रव्यमेवनजातिः।द्वितीयेनवाशब्देनपदार्थोनिरस्तश्चितंजातिर्विशिष्टद्रव्याभिधानमितिं।अतएवतदेवसकलनारूपंपदार्थइतिस्फुटीकृतं।अन्यथावार्थप्रक्रान्तेवार्थोपसंहारोनोपपद्यते।तद्वदभिधानेत्वनभिधानंतावद्द्वयोरपिसमानं।विरम्यव्यापाराभावाच्छब्दस्य।आर्थस्तुजातिद्रव्ययोर्गुणभावःस्याद्वा।प्राधान्येनैवंभिन्नविषयतयापाणिनिदर्शनेजातिद्रव्येशब्देनाभिधीयेतेइत्ययमत्रपक्षः।पदार्थइत्युक्तः।तत्रनामदस्यगौरित्यादेर्गोत्वादिजातिर्नियतक्रियाविषयसाधनेकार्थसमवेतसंख्याजातिविशेषणभावमापन्नाभिधेया।अनाश्रयायास्तदनुपपत्तेः।सामर्थ्यादतीतंद्रव्यमाएवमाख्यातपदस्यापिविभिन्नक्रियाहरणसमवेताभिन्नाभिधानप्रत्ययहेतुक्रियाजातिविषयासाक्षाद्वाचकशक्तिः।कारकादिजातिस्त्वत्रगुणभूतानामपदगतयावाचककारकजात्यादिक्रियाजातिराख्यातापदगतायक्तिद्वारेणसमन्वयमेति।द्रव्यजातिस्त्वेकार्थसमवायात्साधनशक्तिद्वारेणक्रियायोगमनुभवतिसंख्याजातिरप्येकार्थसमवायात्स्वयंक्त्यात्मनाशक्तिद्वारेणक्रियामुखेनैवक्रियान्वयमेतीतिसर्वपदार्थसमन्वयोपपत्तौकल्पनेवाक्यार्थः।यथावोऽहेपणादिहणोरसमसमयभाविरथाद्यन्यहेपणादिजातिरभिव्यज्यते।तथाधिश्रयणादिभिःक्रियाहणोःपचत्यादिक्रियाजातिरितिविचारयिष्यते।व्यक्तिद्वारकंचास्यानित्यायाश्रयिसाध्यत्वमुच्यतेऽपसर्गादिरप्यत्रदर्शनेनाख्यातसहभावी।तदर्थस्यविशेषावद्योतकत्वाज्जातिपदार्थकएवविशेषस्यविशिष्टविश्रांतस्यैवास्यायाकर्मप्रवचनीयोपिसंबंधोजातिनिष्ठएवगु

णशब्दानामप्यशुक्लादीनांगुणजातिवाच्यासंज्ञाशब्दानामपिरूढ्यादिशब्दानांजातिशब्दत्वंसमर्थयिष्यते।तदत्यंवाडव्यायनाचार्यमतेनसार्वत्रिकी
जातिपदार्थद्रव्यस्थोपपद्यते।व्याडिमतेतुसर्वशब्दानांद्रव्यमर्थस्तस्यैवसाक्षात्क्रियासमन्वयोपपत्तेर्वक्तार्थीतगतितयाचोदनाविषयत्वात्।यद्याहचो
दनासुचतस्रोभिर्दितिएकजातिसमन्वयवशेनचात्रसंकेतोपपत्तिः।अनभिधीयमानापिजातिरूपलक्षणीक्रियते।शब्दार्थेयआगृहादोक॥
कादिआख्यातेपिचसाधनाक्षरद्रव्यप्राधान्यंव्याडिमते।देवदत्तःपचतीतिद्रव्येणैवसाक्षात्संबंधेयपत्तेः।क्रियातुगुणभूता।अत्रव्यापारविशिष्ट
हिद्रव्यमाख्यातार्थः।इदंतहितिसर्वनामप्रत्यवमर्शयोग्यंचात्रद्रव्यमितिसार्वत्रिकीयंव्यवस्था।तथाचवक्ष्यतेद्रव्यधर्मयदार्थेतुद्रव्येसर्वो
र्थउपचर्यतइति।अतएवशुक्लादीनामपिद्रव्यपदार्थतासिद्धा।तन्नउपाधिर्व्यक्तिर्वाब्रह्मद्रव्यशब्दवाच्यम्।सर्वशब्दानांविषयइतिवक्ष्यते।
वाव्यक्तिपर्यायोवाद्रव्यशब्दइतिजातिव्यक्तिविकल्पेनसर्वशब्दविषयः।तथाचसर्वशब्दानामित्यभिधानात्पदादप्यर्थोद्वारेप्रत्ययस्यापि
शब्दस्ययथायोगंक्रियाकारकसंख्यादिः।अर्थोद्वारपदार्थोजातिर्व्यक्तिर्भेदेनसमाम्नातः।उभयस्यापिवाशब्दात्प्रतीतेरुभयंपदार्थः।गुणप्रक्ष
नभावभेदाश्रयस्तुमतविकल्पः।नित्यत्वोपचरणेचसिद्धेशब्दार्थसंबंधइत्यत्रभाष्ये।यस्मिंस्तत्वेनविहन्यतइति।द्रव्यस्यापिनित्यत्वंप्रवा
हनित्यतया।शब्दात्सदेववाप्रतीतेः।तदेवंदर्शनभेदेनजातिर्द्रव्यंवापदार्थइत्युक्तेजातिपदार्थविषयेशास्त्रोपयोगीविचारोत्रसमुद्देशे।
पदस्यहियरीक्ष्यार्थमिदंकालभूम्।अर्थद्वारेणैवपदंपरीक्ष्यं।वाक्यार्थेपर्यवसितत्वेनचतद्विचारइति।जातिपदार्थनयेवाक्यार्थभूताख्यातप
दवाच्यायाक्रियायाकथंसमन्वयः।साधनेनहिक्रियान्वेति।नचजातिःसाधनं।तदाश्रयःसाधनमितिचेत्एवमपिजातेःसाक्षाच्छब्देनबोधे ४
तत्वात्सामर्थ्यान्निदाक्षरत्रतिपत्तौयथाबोधितानुषंगइति।असंभवेप्रतिनिधिर्भवतीत्यस्यकर्मणः।काम्यस्यचप्रकृतस्यलोपइत्यवदिश्यतेइति।

प्रतिनिधनुपपत्तेरित्याशंक्यतत्समर्थनायाहः॥ ॥केषांचित्साहचर्येणजातेःशक्त्युपलक्षणम्॥खदिरादिशब्देषुशक्तेःप्रतिनिधीयते॥३॥ ॥६६
केषांचिज्जातिवाचिनामेकार्थसमवायाच्छक्तेःप्रतिपादेनजातिरूपलक्षणमुपायइतिमतम्।अन्येषांपुनस्तात्पर्येणजातिरेवशब्देनप्रतिपाद्यते।का
र्ययोगस्तुतस्याःक्वचित्साक्षात्क्वचिच्छक्तिद्वारेणेतिमता।अथवाकेषांचिदितिशब्दानांयेसाधनाभिधायिनः।तत्रशक्तिस्तात्पर्येणजातेरुपलक्षणत्वान्नां
तरीयकमुपादानंशक्तिर्वाचिन्याविभक्तेः।केवलायाश्चप्रयोगार्हत्वात्।ततश्चप्रातिपदिकस्यावश्यमुपादानमित्येतद्वाक्यायाजात्याशक्तिरवछिद्य
ते।सतिसंभवेतदभावेतुएतत्सदृशापरजातिसहचरितापिशक्तिर्गृह्यते।तात्पर्येणचोदनाद्वाक्यार्थभूतक्रियायासाधनमात्रेहेयेसिद्धेविशिष्ट
जातीयप्रतीत्यर्थसाधनश्रुत्युपादानेपिजातिविशेषस्यासंभवेक्रियासाधनशक्त्यावेदनपरतयाजातेःप्रयोगात्।माभूत्प्रकृतभूतायाःशक्तेर
पित्यागःक्रियायाश्चसंनिधिरितिविशिष्टसमाचारादन्यजातीयद्रव्यागतापिशक्तिःपरिगृह्यतेनचैवमतिप्रसङ्गः।चोदितप्रतिनिधिविषयएवैतत्स्यान्
यस्येष्टत्वात्।तथाचगोदोहादिचोदनासुतदसामर्थ्यान्नमहिष्याद्यापत्तेरप्रसंगः।उपलक्षणत्वाच्चजातिर्नियमनविधत्ते।तद्यथा।उपघातनिवारण
परेवाकोकाकाहिरितिसदृशोपादानेश्रोतार्थत्यागोनभवतीतियत्रत्वसंभवश्चोदितस्यश्रोतार्थस्यतत्रश्रुतिःसफला।तस्मात्खदिरेबध्नातिपलाशेबध्ना
तीत्यादौखदिरादेर्बंधनसमर्थस्यालाभेतत्सदृशकदरादिशक्तसाधनपरिग्रहोयुज्यते।नाधारायाःशक्तेरसंभवान्नातरीयकत्वेनजातेरुपादानम्
नियमस्यावधानात्।जातिर्हिशक्त्युपलक्षणंनकार्यलक्षणायोगिनीतितदाश्रयस्याशक्तत्वेतमंतरेणद्रव्यांतरगतापिशक्तिर्गृह्यते।यदितुतज्जातीय
मेवशक्तस्यात्तदासन्निहितपरित्यागेकारणाभावान्नज्जातीयमेवोपादीयतेतदशक्तत्वेतदुपलक्षणस्योपलक्षणेचरितार्थत्वादसत्यन्यस्यापितत्का
र्ययोगेतदुपलक्षिताशक्तिःशास्त्रचोदितेत्यर्थांतरगताप्ययर्युदस्तत्वादुपादीयतइतिनियमोनास्ति।सदृशार्थांतरगतावशक्तिर्गृह्यतइतिनातिप्रसं

गः।अथयेषांजातिवादिनामतेतात्पर्येणाजातेरभिधेयानशक्तयुपलक्षणंतेषांकथंव्रीतिनिधिरूपपद्यतइत्याशंक्याह॥ ॥अस्वातंत्र्यफलोबंधिःप्रमाणादेवशिष्यते॥अतोजात्यभिधानेपिशक्तिहीनंनगृह्यते॥४॥ ॥अत्रेत्यस्वातंत्र्यफलस्यबंधेर्विधिनाचोदनाजातेःप्रतिपाद्यत्वेप्युपलक्षणत्वाभावेप्यस्वातंत्र्यप्रयोजनबंधिविधिसामर्थ्याच्छक्तिहीनस्यखदिरादेस्त्यागेशक्तंकदरादिप्रतिनिधीयतेवाक्यार्थबोधादिबंधिक्रियाप्रधानमितितत्संपादनशक्तस्यपरिग्रहोन्याय्यः।ननुचदृष्टफलेबंधेकोनुरोधइत्याशंक्योक्तप्रमाणादावशिष्यतइति।यथायादृशफलंप्रमाणादिष्वोदितंतथातदंगभूतोपिबंधिरितिसर्वथासावनुरोध्यः।तथासतियशोर्थेपिबंधनप्रमाणाद्यनुपपत्तेश्चवदानग्रहाभावात्स्वर्गफलस्ययज्ञैरेवासंपत्तिःस्यादितितदनुरोधात्तदंगसयज्यर्थंतत्समुचितसाधनात्क्रेयः।तत्रप्रमाणंहिंसाप्रारंभःमाभूद्धिंसार्थस्यल्युदिषयेरूपमात्रेवक्ष्यतेमानंतस्यारूपशेषेनोद्योत्यते।आदिग्रहणाद्दालभनादेरवदानग्रहणपर्यंतस्यप्राकरणिकस्यागकलापस्योपरोधः।अयमत्रपरूक्षयथाशयः।यदिनामजातेःपरार्थभूतायाःशक्त्यवच्छेदेनोपात्तायाश्चसंभवःतज्जात्यवच्छिन्नस्याशक्तत्वात्।तथापिप्रत्ययार्थस्यशक्तेरवच्छेद्यायाश्चपित्यागोनयुक्तः।अपित्वन्यतापिसंगृह्यते।माभूत्तद्धानिःपदस्यानर्थकं।वाक्यार्थस्यचक्रियायाश्चसंपत्तिरितिगामालभेतेत्यादौचसर्वत्रयोग्यक्रियाविषयेवक्रियावतिषष्ठ्इतिप्रतिनिधावपिकिमितिसंभ्रमः।इदानीमत्रैवलिंगेनापिप्रतिनिधिमुपपादयति॥ ॥संज्ञेषमात्रबध्नातिर्यदिस्यात्तुविवक्षितः॥शक्त्याश्रयेतदालिंगप्रमाणाद्यनुशासनम्॥५॥ ॥बध्नात्यर्थंयथारज्ज्वाबध्नातिरिष्युक्तःसंज्ञेषोयूपेपशोर्योजनंतदेवास्वातंत्र्यलक्षणास्वफलानपेक्षंतन्मात्रं।तद्यदिबध्नात्यर्थोभिमतस्तदातस्यखदिरस्यतयापिसंपाद्यत्वात्संभवेकदरोपादानेसामर्थ्यनास्तीतितत्संज्ञेषाइनरकालप्रमाणादीनांपशुमालभेतेत्यादेर्यज्ञैरेवासंपत्तिरितिसंज्ञेषमात्रबध्नातीत

वायिद्रव्यत्वंतत्रैवयवत्वैकार्थसमवायसंभवात्ततश्चासंभवनियमोनामायंद्रव्यकारोहिनियमः। कश्चिच्छष्टसामर्थ्यातोनभवतियत्रपरेणान्यो
सत्यांश्रुतिःयथावाक्योपदार्थेविप्रतिषेधेपरमिति। कश्चित्पुनरसत्यपिशष्ट्यापारेपदार्थानामितरेतररूपसांकर्यभावादेकचोदनातद्व्यनिष्ठ
त्निष्फलेतिपदार्थस्वरूपविमर्शणातोऽसंभवनियमइत्युच्यते। तथावेदशष्टसामर्थ्यातद्द्रव्यत्वमितिद्वीहिभिरितितत्राध्वावापःशष्ट्यापारः। प्र
खंडेपिहिवाक्यार्थनयेयोद्वारदर्शगतोभेदसंसर्गादिविकल्पः। तत्रवाडिमतेभेदोवाक्यार्थः। पदवाच्यानांद्रव्यगुणद्रव्यांतरनिष्ठत्वेनाभि
धेयत्वात्। जातिवादिनोवाङ्न्यायनस्यतुमतेससर्गोवाक्यार्थः। सामान्यानापदार्थानांसंसर्गमात्ररूपत्वाच्छाब्दार्थस्य। द्रव्यमितिचरितार्थेद्वीहिभिरष्टद्वी
हित्वस्ययवत्वादिभिर्विरुद्धेएकस्मिन्नर्थसमवायइतितत्रतानिनिवर्त्तते। ततश्चप्रतिनिधौवस्तुसामर्थ्यातस्यनियमस्यबाधेपिशष्टस्यद्रव्यत्वमा
त्रस्यावाधितत्वान्नचोदितार्थत्यागः। ननुचनिर्विशेषस्यसामान्यस्यासंभवाद्व्रीह्यादिनाविशेषनिष्ठमेवद्रव्यत्वमाक्षिप्तंएवंचसतिसर्वविशेषाणांश्रुतिसा
मर्थ्यप्राप्तत्वाद्व्रीहिभिरितिपुनःश्रुतिर्नियमफलैवेतिनैतदेवं। श्रोतेनापिरूपेणसंजातेतिकथंश्रोतार्थत्यागःप्रतिनिधौनैतन्न्याय्यम्। नहिशष्टोवस्तुचिंतामनु
सरति। कस्यचिद्देववस्तुभागस्यशष्ट्यापारविषयत्वात्। तथाचयजतिशष्ट्येयत्वेवसामर्थ्यंद्रव्यमात्राक्षेपेनतुतद्विशेषेऽन्यथानिर्गुणस्यद्र
व्यस्यासंभवात्। गुणस्याप्याक्षेपकोसौकिमितिनवर्ण्यते। तस्माद्द्रव्यत्वमात्रस्येवाक्षेपशष्टइतितत्परित्यागोदितविशेषांतराध्वावापोननियमफलइतिशा
स्त्रेणपर्युदासानांविशेषांतराणांप्रतिनिधिसिद्धिः। तदित्थमसंभवनियमत्यागोवर्णितनियममात्रबाधश्चाप्युपपद्यते। इतिसर्वत्रैवक्रियाप्रधानवा
क्यार्थः। तथाचसिध्यर्थयोगेणमाक्षिप्यतेसाधनंतदेवचयदांतरेणविशिष्टंकथ्यते। इत्थंस्थितेयत्रश्रुतस्यसाधनस्यासंभवस्तत्रप्रधानभूतक्रिया
संपत्त्यर्थसाधनांतरंप्रतिनिधीयते। क्रियाहिनप्रतिनिधीयते। प्राधान्यात्। क्रियांतराश्रयणेचकर्मतिरस्कारोदितस्यानुष्ठानाच्छास्त्रस्योल्लंघनस्या

स्यादितिगुणभूतस्यसाधनस्यैवप्रतिनिधानाच्चरितःशिष्टैः। तत्रचप्रधानभूतक्रियायदाकांक्षितस्यशास्त्रचोदितस्यसाधनमात्रस्यत्यागः। व्रीयतुव्रीहा
दिपदोयान्तस्यद्रव्यविषयस्यनियममात्रस्यबाधः। सचनदोषायपदाक्षिप्तमात्रस्यसाधनस्यक्रियासामर्थ्याक्षिप्तस्यप्राधान्याच्छास्त्रचोदितस्याधारू
पद्रव्याभावेतदपरतदाधारूपद्रव्योपादानेपितस्यापरित्यागाच्चोदितार्थविघातभावात्। ततदेवमेतदनंतरकांक्षोद्दर्शनद्व्यमुपपादितमितियथासंभ
वंप्रतिनिधिश्चित्यइतितः। इदानींजातेरशष्टेनाभिधीयमानायांतत्रजात्यंतराभावान्निमित्तशष्टस्यप्रतिनिधायेतेत्याशंक्योपपादयितुमाह॥ ॥स्वजा
तिःप्रथमंशष्टैःसर्वैरेवाभिधीयते॥ततोर्थजातिरूपेषुतद्धर्मोपकल्पना॥५॥ ॥स्वाश्रयासाधारणीभ्रातीयागोशष्टत्वादिकानतुसकलशष्टसा
धारणीशष्टत्वादिः। एवंचासाधारणत्वेनविशेषणतयासंबंधव्यभिचारःगोशष्टस्यार्थजात्यासंबंधव्यभिचारेपीतिस्वजातिरेवमुख्यमभिधेयमि
त्युक्तंभवति। तथाचवाक्यकारः। मवाशष्ट्यैकोह्यर्थेसंप्रत्ययइति। अत्रएकव्यभिचारिणाःस्वरूपजातेरर्थजातेरभिधानेशिष्टस्यानंतरीय
कमभिधानमितिप्रथममित्याद्यायदभेदेनयत्रप्रतिपत्तिः। तदवश्यंतत्रप्रतिपन्नव्यमित्येतावतात्राथम्यंनतुक्रमेणाभिधानात्। यद्वासंबंधयुत्प
त्तिकालायेक्षयाप्राथम्यं। तथाहिसंबंधयुत्पत्तिकालेर्थजात्यानास्तिसंबंधः। तथात्वेवाचकत्वेनतत्रविनियोगोनर्थकःस्यात्। अर्थस्यप्रतिपन्नत्वा
दितिसोर्थस्तावतैवशष्टेनप्रतिपन्नः। यदित्वस्यजात्यभिधानंतदानीनस्यात्। तदानर्थक्यादभिक्रियोगोनस्यादितिप्राक्संज्ञिनोभिसंबंधात्
संज्ञासंज्ञिपदार्थकेयुक्तंभवति। स्वरूपंस्वजातिवदिहनभेदेनकथ्यते। सर्वैरितिस्वरूपैरेरर्थपरैश्चातस्याएवस्वरूपपरतयाव्यवहारात्। तथा
युत्पत्तेरपिशष्टैरविनाभावाच्छष्टस्वरूपेणावस्थिताजातिःप्रतिपद्यते। अर्थस्यद्रव्यादेर्यशष्टस्वरूपाभेदेनावबोधेपियथाप्रतियादितक्रमेण
श्रयेणततःस्वजातिप्रत्यायनादनंतरमर्थजातीनांगोत्वादीनामात्मसुतस्याशष्टत्वजातेःसमारोपस्यकल्पना। नपरमार्थः। शष्टविवक्षत्वेना

थस्यशष्टान्तत्वतोभेदाभावात्।यद्यासंबंधयुक्त्यन्तकालेगोरयमर्थइत्यर्थजात्याशष्टजातेरत्यंतभेदात्सामानाधिकरण्यान्यथानुपपत्त्याभेदाध्यारोपः कल्प्यते।यथागौर्बाह्लीकइति।अन्यथासंकेतस्यैवकर्तुमशक्यत्वात्।ततश्चायमनादिरयोरुभयोर्योवाच्यवाचकभावः।तथाध्यारोपोपि।अन्यथावाच्यवाचकभावएवनघटेत।यथाबौद्धस्यदृश्यविकल्प्यार्थैकाकारोभेदानध्यवसायलक्षणः।नतुयथागौर्बाह्लीकइत्यत्रयुक्तेच्छयाध्यारोपः।व्यवहारशष्टार्थयोःसदैवाभेदावसायात्कथमियंप्रतिवर्णमनभिव्यक्तासाधारणजातिरसमसमयभाविभिर्वर्णैरभिव्यज्यतइतिचेत्।ययोरुपाधित्वाद्विजातिरितिब्रूमः।तथाहिप्रत्येकंकर्मह्रणानामुपव्यंजकत्वेपियत्रथमोक्तेमहणेहणाःसदृशमाणुमात्रवदेशक्रमेणात्मरूपत्वात्।भ्रमणासारूप्यवशादनवधार्यमाणएकैकोभेदएकैकोसमर्थोनियतजात्यभिव्यंजनइतिहणांतरमपेक्षतेनचतस्यभ्रमणहणाद्विशेषोनास्ति।उपक्रममद्योहियामीत्येवंप्रयत्नजनितत्वात्।एवंगोशष्टमुच्चारयामीत्येवंप्रयत्नोयद्यपिगानगगनशष्टजनकात्प्रयत्नादन्यएवहेतुर्भेदाद्यगकारयोरपिभेदएवातथापिसादृश्यादसौउरवधारइतिव्यंजकोपिसन्प्रथमोध्वनिरस्फुटमभिव्यनक्तीत्यावर्त्यमानोपिविशदतरसामान्यविशेषाभिव्यक्तौहेतुः।यदावयवप्रक्रमःवंधःप्रक्रमेणोपलक्ष्येभवति।अथशष्टजातिविशेषोपाधियुक्तायवहाराज्ञवतिष्ठंतेतदानीमसाहचर्यात्परस्परावच्छेदवशेनप्रतिभासनात्।यथाचश्लोकःसकृत्यद्यमानोनावधार्यतेअभ्यासेनतुस्फुटावभासः।तथाचरमवेतसिचकास्तिरंतत्वस्फोटत्वंप्रथमाक्षरेणहिजातेराभासमात्रजन्यते।तदुत्तरोत्तरवर्णकलापेनतुस्फुटतरस्फुटतमपरिछेदाध्यनासंस्कारविशेषोत्पादनेद्वारेणाभिव्यक्तिविशेषस्परभतत्वादोदृष्टेः।तस्माच्छष्टादर्थप्रतियद्यामहइतिव्यवहाराद्ध्वनिमर्थविसायजनकत्वानुपपत्तेः।प्रक्रियानगम्यःप्रथमकाणएवविहितस्वालिप्रयवकंप्रत्यायकशष्टत्वंजातिव्यक्तिभेदेनभिन्नस्फोटस्वभावमेवागीकार्यंगौरयमर्थइतिचवाचकाभेदेनवाच्यप्रतीतेः।तदध्यासचर्वितवयुर्व्यवहार्यार्थिः।तत्रचस्वरूपस्यवाच्यता।प्रथमकाणएवनिर्णीता।इदंतुसंबंधसमुद्देशेपिनिरूप्यते।त

त्रैवतत्स्यात्।शष्टसमवायिसामान्यंबाधिकारणत्वात्कथमर्थजातमभेदेनव्यपदेशेदित्याशंक्यानदृशनेतद्युत्पादयति॥ ॥यथारेकेगुणोतत्वंकषायेव्यपदिश्यते॥संयोगिसन्निकर्षश्चिवस्त्रादिष्वपिगृह्यते॥६॥तथाशष्टेर्थसंबंधश्शष्टेजातिरवस्थिता॥व्यपदेशेर्थजातीनांजातिःकार्ययिकल्प्यते॥७॥ ॥रक्तेगुणेतत्वांतरस्यरक्तस्यगुणस्यभावेरक्तत्वंलोहित्यसामान्यंगुणव्यक्तिसामान्यमुच्यते।तत्समवेतसमवायात्कषायेरक्तगुणाध्यारेऽपेव्यपदिश्यतेव्यपदेशायकल्पते।तद्विशेषणभूतलोहितकषायेऽपचमभिधीयते।लोहितालाक्षेतितेनसंयोगिनोवस्त्रादयः।तयोःसंयोगिनोःकषायवस्त्रयोःसन्निकर्षःसंभेदः।तस्मान्निमित्तान्नापितलोहित्यगृह्यते।संयुक्तसमवेतसमवायाद्वस्त्रादिष्वपिलोहित्यनिमित्तोव्यपदेशः।लोहितवस्त्रमित्यर्थः।तथाशष्टार्थसंबंधादिति।लोहितगुणकषायेप्रथमसंबंधस्थानीयात्।समानाधिकरणस्थानीयाच्चस्थितात्स्वाभाविकात्केवलंयुक्त्यनिकालेनिर्ज्ञातेतदन्यथानुपपत्त्यैबाध्यारोपस्यकल्पनात्।संबंधदेवशष्टजात्याव्यपदेशः।अथेत्रार्थजातिस्तस्याएववाच्यत्वप्रक्रमोव्यपदेशेकल्पते।स्वरूपाभेदेनजातिःकार्ययिकल्प्यते।जात्यादिशष्टेजातिषुवाचकत्वेनप्रवर्त्तमानेस्थितजातिर्नकेवलंव्यपदेशायकल्पते।यावज्जातिकार्यएवान्यथावाव्यपदेशेसतिजातिःकार्ययिकल्पतइत्यर्थः।निःसामान्यानिसामान्यानीत्यर्थजातीनांस्वतोजातिरहितत्वेतत्कार्यशष्टप्रत्ययानुदयनिजक्षणशष्टार्थयोःसोयमित्यभेदेनसंबंधश्शष्टसमवायिनोजातिरर्थेनाध्यारोपिताभेदासंपादयंतीतदात्मनासंपद्यतइत्युपचर्यते।व्यक्तिरूपेचशष्टजातेःसमवायः।नतुवस्तुत्वेस्थितेत्युपपद्यतेवस्तुनिहियोगपद्याभावादवाचकत्वमिति।कथंतत्रशष्टजातेःसमवायःस्यात्॥केवलस्फोटस्यजातिव्यक्तिभेदेमदर्शनइत्यभिप्रायेणस्फोटेजातिःसमवेतात्मर्थभेदेनहिभिन्नस्यनित्यशष्टस्याभिन्नाभिधानप्रत्ययहेतुर्जातिरवश्याभ्युपगंतव्या।अतएवतयाहुरितायाव्यक्तेरेववाचकत्वंउपलक्षणभूतातुजातिराश्रीयतइतिकथमत्रानुयायिन्याव्यक्तेवाचकत्वमितिन।

चोदनीयं शब्दार्थसंबंधश्चात्रयोग्यतालक्षणोऽभेतः सर्वोऽशब्दः संज्ञात्वेन वा नियुज्यमानः सर्वत्रार्थयोग्यतालक्षणेनसंबंधेनसंबंधः केवलंशब्द
रूपवद्देशमात्रेसंज्ञाकर्तुर्व्यापारोनतत्पूर्वसंकेतकरणोर्थसंबंधस्यापौरुषेयत्वात् एवंचादैदुद्दिशब्देनापूर्वएवसंकेतितइतिसर्वेषामनेकार्थत्वा
त् वक्त्रभेदाद्यनेकत्वसमानाकारप्रत्ययनिबंधनंजातिरेवगण्यतेतद्यथा आकाशस्यसंयोगिभेदेनकल्पितभेदस्यानेकत्वेसत्याकाशत्वंव्यवस्थते नचैवं
सर्वस्मात्सर्वार्थप्रतीतिप्रसंगः प्रसिद्धिवशेनार्थप्रतीतेः कुत्रचित्कस्यचित्प्रसिद्धत्वात् प्रसिद्धानांचार्थानांप्रकरणादयोविभागहेतवउक्ताः तद्यथा
गोशब्देनवस्वर्थेषुसन्निहितेष्वपिप्रकरणादेः प्रतिनियतार्थविषयः तदेवंशब्दाज्जात्याशब्दव्यक्तिर्वाचिका प्रथममभेदेनयद्यपिदृश्यतेततोर्थजा
तिस्तत्सद्व्यक्तिरित्ययंवास्तवः क्रमः प्रत्यायनेत्वक्रमतैवाशब्दानुसरत्वेपिवार्थस्यनस्वरूपव्यवगमः यथाह्यालोकाद्गुरितेपिघटोनस्वरूपेणातिरोभवति एव
मशब्दस्वरूपोपरक्तोर्थस्वरूपंरोपेणशब्दालोकयोरर्थप्रकाशकत्वस्यैवंविधस्यदृष्टेः यथाचगौर्वाह्लीकइत्यत्रगोत्वमात्रंप्रतीयते अपित्वध्यारोपितगोरू
पोवाह्लीकः एवमिहापि नतुस्फटिकमणाविवार्थेशब्दानेः समावेशोविवक्षितः तस्यैववाह्लीकवत्प्रत्याय्यत्वात् स्वाभाविकाश्रयमर्थप्रत्याय
नेशब्दानामभेदसंबंधेभ्युपायइतिप्रतिपाद्योपितथैवप्रतिपद्यते नहियुक्तयाधीनमेतत् अनादौसंसारेनैवप्रकारेणसंबंधयुज्यते कोत्रनियम
ोध्यारोपयितुंकल्प्यतांतां अथव्युत्पन्नसंकेतस्यापिवाभिन्नप्रत्ययोत्पत्तेरर्थजातिरप्यस्तीतिनशब्दजातिरेवाध्यारोपितास्त्विति वाच्यं शाद्वीचेयमेवविभ्र
मप्रतीतिरिति चाक्षुषेणरूपादिप्रत्ययेमनिदर्शनभूतेनव्युत्पादितावस्तुसन्निवेशित्वाभावेपिचशब्दजातेरयमनादिरध्यारोपोरूढः सदेवव्यवहारे
शब्दार्थयोरभेदावसायश्चेदस्यापिचगौर्वाह्लीकइतिवत्प्रतिज्ञानान्मिथ्याज्ञानमिदंभवति आकसंबंधसंवेदनसमयादर्थजातयोभेदेनावभास्ये
वाअथव्युत्पन्नसंकेतस्यहिबालकस्यपुरोवस्थितेषुसास्नादिमत्सुपिंडेषुभिन्नःप्रत्ययउत्पद्यते तदावाचकसन्निधानाभावादभिन्नप्रत्ययहेतुरर्थजाति

रवधार्यते अतएवकथंभेदेनतद्वाचिकायामर्थजातौशब्दजातिःसमारोप्यतइतनचोदनीयं जातिःकार्यायकल्पतइत्युक्तमेवार्थसमभि
न्नजातिशब्दैकशेषेजातीनांजातिरिष्यते ॥शब्दजातयइत्यत्रजातिःशब्दजातिषु ॥८॥ ॥आकृत्यभिधानादेकविभक्तौवाऽऽयायनइतिजा
तियदेप्रत्याख्यानादेकशेषस्य तत्फलमेकशब्दप्रयोगेत्रैकशेषउक्तः सहविवक्षायांचैकशेषेणलक्ष्यतेजातिशब्दैकशेषेप्रसक्तमितिवायोजनीयं
सेतिशब्दजातिः अर्थजातीनामभेदेनाध्यस्यमानाजातिशब्दगताजातिरेकशब्दत्वंसंपादयतिजातिशब्दकार्यातद्यथागौर्वाह्लीकइत्यादि
रभिन्नसामान्यनिबंधनस्तदेकार्थसमवायात्समाश्रितविशेषस्वयमेकशब्दप्रयोगः तथाजातयइमाइत्ययमपिजात्याश्रयपरोजात्याश्रयावाचाचकजा
त्याध्यासाश्रयउपपद्यतेशब्दगतंचसामान्यंजातिवाचककार्यमुपचरतीत्युच्यते नत्वर्थजातिष्वेवेतिनियमः केनचिक्रियतइतियदाशब्दजातयो
ऽपिप्रत्याख्याताःतदास्वयमभिधाननगतंजातिकार्यायकल्पतेएवेत्यादिशब्दजातयइत्यत्रेत्यादितज्जातिःशब्दगतंसामान्यंशब्दजातयइमाइत्यत्रैक
शब्दप्रयोगेतस्योच्चारितस्यशब्दजातिःशब्दस्यायाजातिःसाशब्दजातिर्गोशब्दत्वादिकासुव्यक्तिस्थानीयासुप्रतिपाद्यास्वभिन्नशब्दप्रयोगेनिबंधन
मित्यर्थः यद्येवंशब्दजातिःशब्दगतानामपिजातीनामन्यावाचकजातिःस्तासामप्यन्येत्यनवस्थाप्रसंगइत्याशंक्याह ॥याजातिशब्दजातिःशब्दे
शब्देभ्योजातिलक्षणा ॥जातिःसाशब्दजातित्वमत्यतिक्रम्यवर्तते ॥९॥ ॥अथोक्तभेदाद्यदुशब्दजातिशब्देभ्यभिन्नप्रत्ययनिबंधनायाजातिस्तेभ्यएव
शब्देभ्यःस्वाश्रयभूतेभ्योभिन्नस्वभावासा गोशब्दत्वादिशब्दजातिवर्गातिःपातिनीत्यन्तुव्यपदेशांतराद्दार्शशब्दजातिशब्दस्यापिगोशब्दत्वादिवत्शब्दजात
यइत्यनेनैवैकशब्दप्रयोगेसापिप्रत्याय्यतेइतिनप्रयोगानवस्थायनिरस्तमभिप्रायः तदेवंसनिकायसिद्ध्यासंदर्शनाश्रयेणसार्वत्रिकीजातिपदार्थ
व्यवस्थादर्शिता स्वरूपभूताहिजातिः सर्वेषांशब्दानामंतरंगत्वादसाधारणत्वाद्धेयत्वाच्चप्रथमंप्रतिपाद्या इदानीमध्यासानाश्रयेणापिप्रोढवादितया

ङातिपदार्थव्यक्तिमुपयादयितुमाह॥ ॥अथङात्यभिधानेऽपसर्वेङात्यभिधायिनः॥व्यापारलक्षणायस्मात्पदार्थाःसमवस्थिताः॥२७॥ ॥अन्यथात्रसंबंधः॥तथाहि॥अस्तुङातिशष्टङातेरर्थङातीयानाङातिकार्यसंबंधस्तुनघट्युत्पत्तिस्तुनघटतेयत्रहिसंकेतस्तत्रशष्टङातिरध्यस्यते॥सएवत्वनेकत्वादर्थङातीनांसामान्यांतरमन्तरेणानसंभवतीत्याह॥अर्थङात्यभिधानेयीत्यादि॥यदाहिस्फुङाएवार्थङातयःशष्टैरभिधीयंतइत्याश्रीयते॥तदासर्वेङात्यभिधायिनोङात्यादिशष्टाश्चपिंडातिवाचिनएवाननुप्रिःसामान्यानिसामान्यानीतिसिद्धांतात्कथंङात्यादिशष्टाश्चपिंडात्योधराङातिमभिदध्युरित्याह॥व्यापारालक्षणाइति॥व्यापारःकार्यप्रयोजनंतदेवलक्ष्यतेनेनेतिलक्षणंहेतुर्येषांयदप्रत्यायानामर्थानांतेतथानियमितस्वरूपाःकार्यप्रयोजनंतदेवलक्ष्यते॥तेनायमाशयः॥वैशेषिकाणांभवतुनिःसामान्यानिसामान्यानि॥तानिहिव्यक्तिष्वन्वयप्रत्ययावसेयानि॥परोयाधिरूपेणास्वतंत्रव्यक्तिवदिंतावभासित्वाभावात्॥सामान्यांतरेणोपाधीयंते॥वैयाकरणानांतुशष्टोयेर्थइत्यभ्युपेयिनामन्वयरूपावच्छेदेनशष्टस्यप्रत्ययस्योन्नेङातिश्चपिंडातिरविरुद्धाभ्युपगमा॥एतदेवहिव्यक्तिश्चपिंडात्यभ्युपगमेनिमित्तमित्यत्रापितथाभ्युपगमेकःप्रद्वेषः॥प्रत्यक्षाश्चपिंडपदार्थाःस्वकार्यविज्ञानादिकंकुर्वंतीतिःसंतीतिव्यवह्रियंते॥किंपुनःशष्टवाच्याःपदार्थइतिसामान्यवचनाइत्यादयोपिशष्टवाच्यत्वेनैवलक्ष्यंते॥शष्टप्रमाणकानांहियङ्शष्टआहेत्यमात्मार्थरूपंतथाचान्वयिरूपेणागुणोप्यभिधीयमानोङातिरेवयथोपमानसमासेश्यामादिःतथाचोपमानानिसामान्यवचनेरित्युच्यते॥एवंक्रियाप्यनेदेनाभिधीयमानाङातिः॥तथेदंतदितिस्वात्त्वेणविशेष्यतयाभिधीयमानाङातिगुणाक्रियाश्चपिंडव्यमिति॥यथावसरमग्रेनिर्रूप्यतेएवमेतल्लोकव्यवहारानुगुणेनशास्त्रेस्मिन्व्युत्पाद्यते॥शास्त्रांतरप्रसिद्धाहिव्यवस्थालोकविरुद्धा॥लोकेहिगविशृंगेदृष्टेशास्त्रेतिव्यवहारः॥तथेवचचाकरणेप्याधारसप्तमी॥शास्त्रांतरेधवयवेधवयविनिशृंगेगौ॥शास्त्रवाद्यष्टरूढइतिस्यात्॥एवंचशष्टाभिधेयस्येहार्थत्वा

त्सर्वेङात्यभिधायिनोयस्मात्शष्टव्यापारेणपदार्थालक्ष्यंते॥यद्यपिबहूनूतवस्तूनानसंततथापिशष्टैस्तथाप्रत्याय्यमानोतोभिधव्यापारवशादन्वयिरूपेणप्रत्यायनाद्व्यक्तिरेवपदार्थेसिद्ध्येद्योर्थः॥अभिधालक्षणव्यापारत्वमेवव्यक्तयति॥ ॥ङातौपदार्थेङातिर्वाविशेषोवापिङातिवत्॥शष्टैरपेक्ष्यतेयस्मादतस्तेङातिवाचिनः॥९॥ ॥ङातौपदार्थइतियहावछेदंकरोति॥अत्रहिपक्षेसर्वएवहिशष्टोङातिवाचीत्यभ्युपगंतव्यंभवतुवामाभूद्ङातिशब्दोङातिव्यतिरिक्तव्याङात्येकस्यावैवापेक्ष्यते॥प्रत्याय्यतेनागीक्रियते॥स्वालक्षणेनहिवस्तूनांभेदःस्फुटंनशक्यतेसत्वेपिरूपावेशेनसंबंधव्युत्पत्तौशष्टस्यवाचकत्वात्॥तथाचङातीनामितरेतरभेदोवस्तुसमाभिधीयते॥अपित्वभेदकल्पनेनतान्अभिधीयंते॥अभेदश्चसामान्यमितिसिद्धमेकशष्टत्वंङातयइतितथायोविशेषःसंङाशष्टानांवाच्यःप्रतिनियतःसोपिङातिवत्प्रसिद्धङात्यातुल्यमेवक्ष्यते॥शष्टैस्तुन्नापिहिबाल्यकौमाराद्यवस्थाभेदःशष्टेननस्पृश्यते॥अपित्ववस्थातरूपमेवानुगतमप्रसिद्धप्रत्यभिङाप्रत्ययनिमित्तंतत्रावश्याभ्युपगंतव्यंअतोयस्माद्ङातिवत्सर्वयपेक्ष्यते॥शष्टैस्तस्माद्ङातिविशेषप्रतिपादयंतःसर्वेङात्यभिधायिनइतिङात्यभिधानव्याप्तिनिगमयति॥इत्थंचसंङाशष्टानामपिङातिवादिमतेङातिशष्टत्वमित्येवशष्टानांपरप्तिःएवंदर्शनांतरेपिशष्टव्यापाराश्रयेणैवव्याप्तिसिद्धिरित्याह॥ ॥द्रव्यधर्मपदार्थेतुद्रव्येसर्वोर्थउच्यते॥द्रव्यधर्माश्रयाद्द्रव्यमतःसर्वोर्थइष्यते॥२॥ ॥नकेवलक्रमयोवङातिपदार्थवादिनैतदंगीक्रियते॥सर्वोर्थोङातिरिति॥यावताद्रव्येपिपदार्थेद्रव्यपदार्थपक्षेपिद्रव्यधर्मसर्वोर्थउच्यते॥कुतःद्रव्यधर्माणांमाश्रयाणात्॥द्रव्यमतःसर्वोर्थइष्यते॥व्याप्तिरतःसिद्धाभवतीत्यर्थः॥द्रव्यवादिनापेतदभ्युपेतव्यं॥व्याप्तिसिद्ध्येशष्टेनयोर्थउच्यतेसर्वोसौद्रव्यधर्मयुक्तएवेत्यभिप्रायः॥यथाचद्रव्यवादिनःकेचिदेवशष्टाःमुख्यद्रव्यवाचिनस्तदन्येतूपचरितद्रव्याकाराभिधायिनः॥तथामतापिङातिवादिनोमुख्यांङातिमभिदधतिकेचिदुपचरितामन्यइतिमतद्वयेसाम्यात्॥तत्रद्रव्यधर्माइदंतेदितिप्रत्यवमर्शयोग्य

त्वंपरानपेक्षत्वात्स्वातंत्र्यंलिंगसंख्यायोगश्चेत्येवमादयः।तेषांशुक्लादिगुणेषध्यारोपानेयंद्रव्यस्यैवधर्मायेषांमतंद्रव्यधर्माणः।तथाहिशुक्लोनीलस्त्रीपुंनपुंसकानित्यत्वगुणाः।तथैकत्वादिभिः शेष्टैःप्रत्याय्यमानागुणादयोनद्रव्यधर्माणः।स्वातंत्र्यादिरूपेणावभासतइतिसर्वेषिद्रव्यस्वरूपेणाभिधीयते।एवंशब्दकारश्रयेणव्याख्यातम्।अधुनावैशेषिकदृष्ट्याप्यर्थगतसमानधर्मश्रियेणजातियदार्थव्यापिमाह॥ ॥अनुवृत्तिधर्मविजातिःस्यात्सर्वजातिषुव्याहत्तिधर्मसामान्यंविशेषेजातिरिष्यते॥३॥ ॥जातीनामेतज्जातित्वंयत्स्वाश्रयानुवृत्तिः।सर्वजातीनांसाधारणोधर्मः।साचताभ्योनन्यापिसाहश्यभेदेनपरामृष्टासतीसर्वासुजातिः।सर्वैर्वैहिजातिःस्वव्यक्तीरनुवर्ततेउपलक्षणंचैषधर्मः।तेनस्वानुरूपप्रत्ययजनकत्वंयद्वाद्रव्यंतद्रूपमाभाति।स्वानुरूपाभिधानहेतुत्वंयद्दशाद्रव्यंतद्रूपाभिधानवाच्यंभवति।प्रत्याश्रयंचसर्वात्मनापरिसमाप्तिःसाधारणोजातिधर्मः।यदिहिभागशोजातिर्वर्तेतातदाभागएवगोत्वादिप्रत्ययःस्यात्।सपूर्णश्चविषाणाद्यवयवदर्शनेपिस्फुटितिगोत्वाकारःप्रत्ययःप्रसूयते।प्रत्ययाश्रयपरिसमाप्त्याश्रियेगुणाःप्रतिद्रव्यंभिन्नाजातिस्त्वेकैवेत्येवमादयोपिसाधारणधर्मवाच्याः।यथाचगोत्वादिजातिःसर्वव्यक्तीर्व्याप्नोति।तथैतेधर्माःसर्वजातीर्व्याप्नुवंतीतिजात्यातुल्यरूपत्वाज्जातिकार्यायिकल्पंते।एवंसर्वेएवविशेषाव्यावर्तन्ते।अन्यथानुगमात्सामान्यानिस्युर्निर्विशेषाइतिसर्वविशेषेष्वसाधारणीव्याहत्तिः।सामान्यसंज्ञोधर्मोपिवस्तुषुजातिरित्युच्यते।नन्वेवंगोपिंडेधपिसास्नालांगूलककुदखुरविषाणाद्यवयवसंबंधस्यसाधारणत्वादेवजातिरस्तुमेवंसास्नादिमत्त्वेनसास्नादिमानित्यादिप्रत्ययोऽन्यतेनतुगोगौरिति।अनुरूपेहिकार्यकारणंकल्प्यतेतद्यथादंडीतिप्रत्ययेदंडसंबंधेनिमित्तंनतुदंडोपादिस्वायथेवमनुरूप्यान्निजाजातिर्जातिरितिप्रत्ययोयुक्तः।व्याहत्याचविशेषोविशेषइतिनैतदेवंगत्यंतराभावादत्रसदृशएवधर्मेजातिःकल्प्यतेसुखेजातिमत्त्वेबाधकोपपत्तेः।तथासामान्येषपरसामान्यसमवायेनावस्थादिबाधकमन्यत्रनिर्णीतंनित्यद्रव्यवृत्तिषुव्याहत्तिप्रत्ययजनकेषुविशेषेषु

षुसामान्याभ्युपगमेसंशयापनोदायविशेषान्तरकल्पनेतेषामपिसामान्यसमवायेसंदेहविषयत्वाद्दशेषान्तराभ्युपगमेनवस्थाप्रसंगः।अथकश्चिन्निःसामान्योस्तिविशेषः।तदातदविशेषात्सर्वेदितथास्थुरित्यन्यत्रविस्तरेणोक्तंगोपिंडेषुसामान्याभ्युपगमेनकिंविद्याधकमितिनतत्रयथाकथंचिन्निमित्तपरिकल्प्यं।तदेवयत्रजात्यभ्युपगमेप्रमाणंबाधास्तितत्रसदृशधर्मरूपाजातिः।तथाचसामान्याभ्युपगमेभावत्वायत्नेः।अभावनात्मकधर्मसामान्यादन्यत्रप्रत्ययविषयतयेतिसैवतत्रापिजातिः।कालाकाशदिशामेकत्वान्नित्यत्वेनावस्थाभेदाभावाद्दाकथंजातिर्येनव्याप्तिसिद्धिरित्यत्राह॥ ॥संयोगिधर्मभेदेनदेशेचपरिकल्प्यते।तेषुदेशेषुसामान्यमाकाशस्यापिविद्यते॥४॥ ॥यथासामान्यविशेषाणामन्वयिधर्मेणाधिरभेदःतथाकाशस्यापिसंयोगेनाधिरभेदइतिश्रुतात्हेयःसमुच्चयः।आकाशेनसंयोगोविद्यतेयेषांधटादीनांतेसंयोगिनः।आकाशंहिसर्वेषांभूतानामधिकरणं।अवकाशदानाहितदाकाशं।मूर्तास्तुभावाःपरस्परंहिविबंधकाइतिनतेऽवकाशदायिनः।संयोगिनाधर्मभेदःप्रत्यक्षादिप्रमाणसिद्धःपरिमितत्वात्तद्दशाद्वालोकप्रसिद्धपरिमितदेशवृत्तित्वायत्रहिदेशेसंयोगःपरिसमाप्तोवर्ततेसप्रदेशोभवत्याकाशस्यानेकः।कार्यप्रतिदेशःप्रदेशइतिनिर्वचनात्।गुणाश्चकेचिद्व्याप्यवृत्तयोयथारूपादयः।संयोगस्तुमूर्तिपरिच्छिन्नवस्तुवृत्तिरितिसर्वदाप्रदेशवृत्तिरेव।अतःसंयोगस्यनियतदेशतयासंयोगिनोपिनियतदेशवृत्तयइतिसंयोगिधर्मभेदेनाकाशस्यभेदोभवतुपाधिकृतोनस्वतः।यदाहदेशोचपरिकल्पितइति।देशभेदाश्चसामान्यमाकाशस्यापिविद्यते।अतश्चप्रतिदेशमिदमाकाशमिदमाकाशमित्यभिन्नाभिधानप्रत्यायानुवृत्तिलक्षणमाकाशसामान्यमाकाशशब्दगोचरोस्ति।एवंसामान्यवत्कालादीनामपिप्रदेशपरिकल्पनेनसामान्यमुपवर्णनीयंतथाहि।कालस्ययुधिष्ठिरादिसंयोगवशेनभेदेसत्यभिन्नंकालसामान्यंकालसामान्यमस्ति।एवंमेरुप्रदक्षिणावर्तमानस्यसवितुर्लोकपालगृहीतेदेशविशेषैःसंयोगास्तदुपाधिनास्तेनदिशःसंतिभेदभिन्नभेदेकसामान्यंदिक्शब्दवाच्यं

परकल्प्यं। आत्मादृष्टशरीरमन्यदेवेति तत्रायस्येवात्मत्वसामान्यं। एवं समवायस्यापि संबंधिभेदान्नानोपचारेण सर्वत्रैकबुध्यनुवृत्तिजातिः परकल्प्य-
नीया। ननु च संयोगिभेदेनाकाशस्य देशः परिकल्प्यस्तेन संयोगिनामिति तितरेतराश्रयत्वं नैतदस्ति। इतरेतरव्यावृत्तिरूपत्वादाद्यादीनां प्रत्यक्षादि-
प्रमाणावसितमूर्त्तित्वात्परिछिन्नपरिमाणत्वं बोधयति। कल्पिताश्चाकाशदेशा लोकबुद्धिसिद्धाः। संयोगिवस्तुगतं परिछिन्नदेशतां ज्ञापयंति। सामान्य-
तया त्वाकाशदेशत्वेनाद्यादीनां प्रत्यक्षादिप्रमाणावसितरूपविरुद्धव्यापित्वमारोपितं। स्वगतेन परिमितत्वेनाकाशस्य प्रदेशकल्पनया निराक्रियं-
ते। यद्येवं कल्पिता देशाः कथमाकाशस्यास्तोनिरवयवस्य देशभेदनिबंधनकार्यप्रच्छादनलक्षणं व्याघातप्रदर्शनलक्षणं वा कुर्युः। येनतद्व्याघातविरो-
धीयेत। उच्यते। वास्तिक्यानीयानां देशानामेतदर्शनं यथा सत्यत्वमसत्यावस्तुरूपाः स्युस्ताइतिवक्ष्यते। तथेहाप्याकाशस्य सत्यत्वेव्यक्तीनानाकश्चिद्वि-
रोधः। अथवा मुख्याएवाकाशस्य देशा घटादीनामित्येत्याह॥ ॥अदेशानां घटादीनां देशाः संबंधिनोयथा॥ आकाशस्याप्यदेशस्य देशाः संयोगिन
स्तथा॥१५॥ ॥इहदेशोवयवउच्यते। घटादयश्चावयविनः स्वात्मनि निरवयवा॥ येहितेषामवयवभूताकपालादयस्तेच्चारंभकाकारणभूताश्च॥
तिरिक्ताएव। एवं समवायसंबंधेनसंबंधिनः। एवमाकाशमपिकेनचिदनारब्धत्वादमूर्त्तद्रव्यापि निरवयवमित्यात्मभूतदेशाभावाद्व्यादयः संयोगिन
एवास्य देशाः। तथातद्भेदादाकाशभेदेसर्वत्राभिन्नप्रत्ययानुगमाज्जातिरयिकल्प्या। आकाशस्यावच्छिद्यतोर्थदेशास्तस्यभवंति। नत्वकृतावच्छेदंवाका
शमपि। तेषामाधारभावापन्नेर्देशइत्यन्योन्यदेशत्वमूर्त्तमूर्त्तयोः। मूर्त्तास्त्वव्यापकाः। परस्परमवच्छेदकानभवंतीत्याधारएवतेषां देशः। कथं
नर्हिदेशेगोणाव्यवहारः। यदिहिकस्यचिन्मुख्याः प्रदेशाआत्मभूतास्तुल्यदायंयुक्तः स्यान्नान्यथेत्यतआह॥ ॥भिन्नवस्त्वाश्रयाबुद्धिः संयोगिष्वनु ११
वर्त्तते॥ समवायिषुभेदस्यग्रहणंविनिवर्त्तते॥१६॥ ॥अतः संयोगिदेशानांगोणत्वंपरिकल्प्यते॥ अविवेकात्रदेशेभ्यामुख्यत्वंसमवायिनाम्॥१७॥ ॥

भिन्नेष्वेकसद्वस्तुनश्चाश्रयोयस्याबुद्धेः। अप्राप्तयोः प्राप्तिसंयोगइतिष्वेकसद्पदार्थविषयासंयोगसिद्धेः। भेदस्यग्रहणंविनवर्त्ततइतय
तोष्वेकसिद्धानामिहबुद्धिहेतुः समवायोयथाकपालेषुघटइति। अतइतिभेदेनग्रहणाद्विवेकाविवेकुमशक्यत्वाद्यतोभिन्नाबुद्धिः संयोगिनाम
तस्मत्रदेशानांगोणत्वायतश्चसमवायिनामभिन्नाबुद्धिरतस्तत्रमुख्यत्वंसमवायप्रभावाद्विप्रदेशेष्वसमवायिनोविवेकुमशक्यतइतितेष्वेवदेशेषुक-
पालादिष्विवतद्वयविद्रव्यमुपलभ्यते। अतस्तत्रमुख्याः समवायिनः प्रदेशत्वेनव्यवस्थाप्यंते। संयुक्तानातुनैवमितिगोणत्वमित्यनेनोपचरितत्वमाकाशदे-
शानांसमर्थितं। ननुचयथाघटादीनांसंयोगिनापरस्परदेशाभावोनभवतिएवमाकाशेनापिनस्यात्। नैतदस्ति। आकाशेनसदासबंधाद्व्यादयइतितत्राभा-
रोपेयुक्तः। नतुघटादीनांमनियतसंयोगानां। अतएवघटादिष्वाकाशानुगतप्रत्ययोदृश्यतएव। घटाकाशः पटाकाशइत्यादि। अध्यारोपेणाचभेदविगलनमि
ष्टं। तदेवंवैशेषिकपदार्थदर्शनेनव्याख्यिरूपपादिता॥ इदानींविज्ञानवादेनापिपदार्थव्यवस्थामाह॥ ॥अनुपप्लवनिरूपायाप्रख्यतामाकृतिंविदुः॥ केचि
द्व्याहुस्तदुपादुःखत्वेनप्रचक्षते॥१८॥ ॥सर्वपार्षदहीदृशास्तमितिशब्दार्थोर्थइतिवादपदार्थव्यवस्थेयं। अनुगताकारायाबुद्धेस्तस्याप्रतिभासमानस्त-
दाकारोर्थस्तदुपतयावसीयमानवपुर्दृश्यविकल्पयोर्भेदाध्यवसायात्सामान्यमाहुः। व्याहतआकारबुद्धिसन्निवेशोकारोत्रचदर्शनेदृश्यमितिप्रसंगा
दुक्तं। एवंचवाह्यस्यसामान्यस्याभावात्तत्राकाशादावपितत्समर्थनेनप्रयतितव्यं। अनयद्भवनीयादिनाकारप्रत्ययोपजनस्यसर्वत्रैवसिद्धेः। वि
ज्ञाननयेचसर्वमेवप्रत्ययात्मकमंगीकृतमेव। शब्दाउच्चरिताद्याकारवतीबुद्धिरुत्पद्यतइतितदाकारस्येवशब्दार्थत्वेनबुद्धेः सहाकारोनबाह्यो।
स्तुनवाशब्दाच्यस्तस्यनकाचित्कृतिः। ननुचवस्तूनांदेशकालादिनिमित्तोभेदइतितदनादरेणाभिन्नाश्चेवतानिसिद्धानीतिकिमर्थंयतिरिक्तकल्पना।
यांप्रयस्यतइत्याशंक्याह॥ ॥भिन्नाइतिपरोपाधिरभिन्नाइतिवापुनः॥ भावात्मसुप्रपंचोयंसंसृष्टेष्वेवदृश्यते॥१९॥ ॥निरुपाधिनोवस्तुनोव्यवहार्यत्वा

त्सर्वएवपरोपाश्रयोव्यवहारइतिसामान्यादीत्यतिरिक्तकल्पनेनैवमाकारीत्यत्रतात्पर्यार्थः।तदेवव्यतिरेकमुखेनापिप्रपंचयति॥ ॥नैकत्वंनापिनानात्वंनसत्त्वंनचासितां॥आत्मतत्त्वेषुभावानामसंसृष्टेषुविद्यते॥२०॥ ॥एकत्वसंख्याधीनएकत्वेनव्यवहारः।पृथक्त्वनिबंधनोनानात्वेनासत्ताधीनःसत्त्वेनरूपसत्त्वेनानुसामान्यादीनामभोपाधिर्नास्तीतिव्यवहारइतिसंसर्गदर्शनेसर्वःपरोपाश्रयोयंप्रपंचोवेदितव्यः।एवंव्यतिरिक्तोपाधिदर्शनमुपन्यस्याधुनाशक्त्यएवोपाधयइत्यद्वैतदर्शनाश्रयेणापिप्राह॥ ॥सर्वशक्त्वात्मभूतत्वमेकस्येवेतिनिश्चयः॥भावानामात्मभेदस्यकल्पनास्वादनर्थिका॥२१॥ ॥एकमेवब्रह्मसर्वशक्तीतिप्रमाणेसिद्धेस्मिन्नर्थेविद्यापरिकल्पितस्वभावभेदस्यापारमार्थिकत्वान्नानात्वेनीयमानशक्तिभेदएवैकस्ययुक्तोनस्वरूपभेदः।तथाचतस्माद्द्रव्यादयःसमीपदेशव्यक्तयोभिन्नलक्षणाःपदार्थनिष्ठयाभूताःएकस्यैवशक्तयोविलक्षणव्यापारानुमेयाइतियथायथमुपगतसमन्वयाः।आवरणाद्यर्थक्रियाकारिण्यइत्यस्मिन्पक्षेसर्वत्रैवजातिव्यक्तिप्रविभागःकल्पितःसत्यासत्यौतुयोभागावित्यत्रवक्ष्यमाणइतिनाकाशादीनामपिकश्चिद्विशेषइत्यर्थः।यथायथाहिवैशेषिकानांव्यतिरिक्तंसामान्यमेवमिहकेवलंविद्यमूर्तेःपदार्थस्यशक्तिमात्रंनकेवलंसामान्यमेवयावद्द्रव्यादयोपीतिकथितंभेदाभ्युपगमेपिद्रव्यादीनांसंसृष्टानामर्थक्रियेयमेकमेवशक्तिमदस्तित्वमित्यर्थः।तत्रैतत्स्यात्।संसृष्टानांसाधनत्वेनासामर्थ्यंसंसर्गस्यतथात्वात्।तत्कथंव्यतिरेकेद्वैतायत्निरित्याशंक्याह॥ ॥यथैवचेंद्रियादीनामात्मभूतासमग्रता॥तथासंबंधिसंबंधसंसर्गेपिप्रतीयते॥२३॥ ॥चक्षूरूपालोकमनस्मराआत्ममनइंद्रियार्थाःपरस्परमभिमतविशेषाःसंघटिताविज्ञानहेतवोन्वयव्यतिरेकाभ्यांदृष्टाइतिनेयमेभ्यःसामग्रीनामपदार्थांतरंजनिकातएवहिसामग्रीजनकाःसामग्रीमदृष्ट्वाचाक्षुषस्यांतरस्यानुपलब्धेःएवमेकेनसंबंधिनासर्वशक्तीनांसाधारणभूतत्वेनप्रकृतत्वात्संबंधेद्रव्यादिशक्तीनांततोयमे

८ ४ ॥ ॥तस्माद्द्रव्यादयोसर्वाःशक्तयोभिन्नलक्षणाः॥संसृष्टाःपुरुषार्थस्यसाधिकानतुकेवलाः॥२५॥ ॥द्रव्यगुणकर्मसामान्यविशेषसमवाय ४ ८

कस्मादाधारव्यतिरेकात्संसर्गोरूपसमूहवत्तस्मान्नायंसंसर्गोसतिपुरुषार्थसाधकेस्वभावभूतासमवायतावद्ज्ञायतेतत्रापिबाह्यात्मभूतेवान्यायायात्माद्रव्यद्रव्यमात्रेणगुणादिसंसर्गरहितेनव्यवहाराभावात्।एवंगुणादिमात्रेणात्यवश्यभाविनःसंसर्गस्यद्रव्यादिभिर्विवेकानवधारणात्तत्रस्वभावतेवेतिकश्चित्स्याद्दोषः।तथासंबंधिसंबंधसंसर्गेपिप्रतीयतइतितत्रापिसंबंधिनासर्वशक्त्याधारेणसंबंधंतइतिसंबंधद्रव्यादिशक्तयःसंबंधिनोद्रव्यादिशक्तीनामन्योन्यसंसर्गेप्यात्मभूतएवेतिव्याख्यायतेअथवासर्वशक्तेःपदार्थस्यसंबंधिनासंसर्गेपिसंसर्गविस्तारायामपितथैवासौसंबंधःआत्मभूतएवासौससंसर्गइत्यर्थः।क्वचित्सामान्यानुगमाद्विश्वस्यप्रमाणसिद्धोभेदइतिप्रथमकांडएवनिरूपितंतदेवयथादर्शनंजातिर्जातिरिशब्देनशब्दपादयतइत्युपादितंसाचनित्येतिनित्यःशब्दार्थःतथाचनित्यावेवोपवर्णितावित्युक्तंतत्रजातेर्नित्यत्वेकार्येपियोगमाह॥ ॥नैतदुपपद्यतेकिंविद्यजातिर्निर्विषयेति॥आत्माभिव्यक्तयेजातिःकारणानांप्रयोजिका॥२४॥ ॥व्यक्त्यधीनाजात्यभिव्यक्तिरितिस्वाश्रयकारणानांप्रयोजकत्वंनिवावलंबतेजातिःसदासन्निहिताकार्योन्मुखीकारणानांसहकारिणीत्यर्थः।निमित्तकारणत्वाद्धेशेषिकदर्शनेजातीनामेषोर्थः।प्रयोजकपदेनभग्णाभिहितः।ननुकारणेषसन्निधानात्कथंप्रयोजिकेत्याह॥ ॥कारणेषुपदंकृत्वानित्यानित्येषुजातयः॥क्वचित्कार्येभिव्यक्तिमुपयांतिपुनःपुनः॥२५॥ ॥सर्वगतत्वाज्जातीनांकारणेष्वपिसन्निधानात्तदसंबंधः।तथाचजात्यात्मनाकारणेषुकार्याणामवस्थानाज्जातिरूपोपादानेनतदवसायात्तत्रसाधनानांप्रवृत्तौकार्यभरंभेतत्समवेतजात्यभिव्यक्तिरसहदाश्रयोपलब्धौनभवति।नित्याःपरमाणवःकारणानिदर्शनांतरेवाप्रधानयुरुषादयःस्युर्नित्यावीरणादयः।क्वचिदितिदृश्येषुकिंचित्किलकार्यंजात्याश्रयनिष्पन्नमपदृश्यंयथावायुरद्रव्यमितितत्रहितज्जात्यभिव्यक्तिर्नास्तिइत्यंचकृत्वाप्राग्भावाद्विज्जातेर्विद्यमानत्वान्नित्यत्वंयोक्तंतथाचजातिपदार्थनयेत्रजातेरुभयथायोगंदर्शयति॥ ॥निर्वर्त्यमानयत्कर्मजातिस्तत्रापिसाधनं॥स्वाश्रयस्याभिनिष्पन्नो५

साध्यक्रियायाः प्रयोजिका ॥२६॥ ॥कटंकरोतीति कथमसतो निवर्त्यमानस्य क्रियायां साधनभावः कर्मणा इत्येतदत्रोच्यते नावतरति ज्ञातेः सत्वात्साश्रय नव
र्त्तनाय क्रियां प्रत्युक्तेनकारणसंबंधन्यायेनप्रयोजकत्वाद्विजातिरूपाश्रयेणात्वसाधनता व्यक्तिरूपाश्रयेणाच कर्मता निर्वर्त्यविकारक कर्मेतिसामा
नाधिकरण्योपपत्तिः नहिजातिर्व्यक्त्याश्रयंतंभिन्ने गवाश्ववत्समूर्छितस्वभावादित्युभयरूपाश्रयोव्यपदेशो विरुद्धः शाक्यविकार्ययोस्तुकर्मणोः सत्वात्स
तएवसाधनोपपत्तिरितिनिर्वर्त्यमानमितिविशेषाह ज्ञातात्मनाचवैरूप्यंवस्तुकारणोयुक्तोयेषुप्रवर्त्तनेतदर्थिनइतिप्रयोजकइत्युच्यते एतच्चज्ञात्यभि
धानपक्षेसंभवति घटशब्देनज्ञात्यभिधाने व्यक्तिपदार्थपक्षेतूपचारात्तत्राश्रयसाधनत्वमवसेयं तथा हि व्यक्तीयदार्थशब्दोर्ज्यमानस्यकर्मणः साधनत्वंतथा
सिद्धं बुद्धिरूपप्रकल्पितमिति कारणान्नाप्रयोजिकाजातिरित्युक्तं तथाचजातिपदार्थपक्षेनद्रव्यस्यक्रियासाधनत्वंत्रुटितसेवविधिप्रतिषेधयोः
साधनंजातिरित्याह ॥विधेर्वाप्रतिषेधेवाब्राह्मणत्वादिसाधनं ॥यत्राश्रिताश्रिताजातेः संख्याजातिर्विशेषिका ॥२७॥ ॥जातेः पदार्थत्वेतत्रविशे
षोदितेप्रतिव्यक्तिपरिसमाप्तत्वात्तस्याः सकृदनुष्ठानेपिकृतःशास्त्रार्थोब्राह्मणमालभेतेतिएवब्राह्मणान्नहन्यादित्यपिप्रतिषेधेजातावेवासकृद
नुष्ठानेपिपुनरुक्तंघनेचोदितस्यदोषः तथाहिअहननंचोदितहननंतुकश्चिदनुष्ठितमितिविरुद्धक्रियाकरणात्प्रत्यवायएवाकश्चित्तुविध्यनुष्ठानात्त
दभावेपिनविरोधः तथाचाहुः नाकरणानिविधिर्बाधनेप्रतिषेधस्तुक्रियानिवर्तयतीतिः तस्माद्यदाहननबुद्धिरुत्पद्यतेतदातदाप्रतिषेधः सर्वत्र
ब्राह्मणजातौव्याप्रियते अत्रचज्ञात्यवच्छिन्नप्रतिषेधवभासस्यसकल्पस्यानुष्ठेयत्वंइत्यंप्रवृत्तिनिवृत्तिभयेयुरुभार्थेसर्वत्रजातेरुपयोगोदा
र्ढितः अनुष्ठानस्यप्राधान्यान्नदाप्रधानभूतेषुसामान्ययुज्यतेद्रव्यसंख्येतिवक्ष्यमाणन्यायेनसंख्याविवक्षामाह व्यक्त्याश्रितेति व्यक्तिद्वयाश्रि
तायेकत्वसंख्यातदाधारायाजातिराश्रयभेदभिन्नेष्वेकत्वगुणेषुप्रत्ययानुवृत्तिनिमित्तंसामान्यपदिक्षवाच्या द्रव्यजातिमेकार्थसमवेतसमवायाद्व

द्व्यनित्याज्जातेः पदार्थत्वेविभक्तेरर्थसंख्याजात्यभिधायित्वात् वास्तवेनचरूपेणासंख्याजातिर्विशेषिका शब्देनतुप्रत्ययाद्यस्याप्राधान्याद्वि
शेष्यासौ एवंचैकत्वसंख्यायाश्चत्रविवक्षितत्वान्नयुगपदनेकव्यक्तिविषयमनुष्ठानंचोदितं सत्यपिजातिपदार्थत्वेएकस्यामपिव्यक्तौसर्वात्मनाप
रिसमाप्तजातिरितिनकाचित्क्षतिः कामनाहेतुकश्चविधिरितिसत्यकामनायामन्यत्रेष्यनुष्ठानाविरोधः एवंप्रतिषेधेपिहननबुद्धिनिमित्तमिति
तदुन्मत्तोसर्वत्रतत्प्रसक्तिः तदेवंजातेः पदार्थत्वेचोदनासूपपत्तिः यदाहवार्त्तिककारः धर्मशास्त्रंचतथेति नन्वजातिरेवपदार्थइत्यवधारणानुपप
त्तिः तस्याःस्वाश्रयसमवायाविरोधात्सत्यएवंवासांकर्यसिद्धेः कारणानामाश्रयेषुप्रतिनियतेषुभावइत्याश्रयानुत्कर्षयितुमशक्याजातिः केवलाकथं
शब्देनाभिधीयतइत्याशंक्यदृष्टांतेनैतदुपपादयितुमाह ॥यथाजालादिभिर्व्यक्तंमुखमेवाभिधीयते तथाऽवैरभिव्यक्ताजातिरेवाभिधीयते ॥२८॥ ॥प्रति
विंबेभावान्नरोन्यत्रविरूपपरिणामेत्यादिनापूर्वनिरस्तेतिमुखादिप्रतिविंबमादर्शादौत्यापिदृश्यमानंमुखशब्दाभिधेयमादर्शादिव्यंजकरहि
तंसदेवंशब्दोपिजातिव्यक्तिरहितामभिदधातीत्याशयमाशयः व्याश्रयसमवायाद्वियोगेपिसर्वत्रभेदात्संकेतोपपत्तेर्जातिः शब्दाभिधेयासदा शब्दैका
नेतथाप्रतीतेः ऐंद्रियकेतुज्ञानेविवेकानवसायाद्भवतुजातिर्व्यक्तेः समूर्छितावभासः शब्देतुयद्यासंकेतप्रतीतिहेतुत्वेनकाचिन्न्यूनतिः यद्येवंशब्द
प्रतीयमानाव्यक्तयः कथंशब्दज्ञानविषयतयाजातौविशिष्यंतइत्याशंक्याह ॥यथेंद्रियगतोभेदइंद्रियग्रहणादृते इंद्रियार्थेष्वदृश्योपिज्ञानभेदा
यकल्पते ॥२९॥ ॥तथात्मस्वरूपग्रहणात्केषांचिद्व्यक्तयोविना सामान्यज्ञानभेदानामुपयांतिनिमित्तताम् ॥३०॥ ॥शब्दायुगपदुपलभ्यमानाव्यक्तयानुपयन्त्यानु
मितसत्तानींद्रियाणि नित्यपरोक्षत्वादनुपलभ्यमानस्वगतचक्षुःश्रोत्रादिविशेषाणि शब्दस्यस्पर्शरूपरसगंधेंद्रियार्थेभ्यश्चात्मादिप्रत्ययेविशेषहेतु
भावंनियमेनप्रतिपद्यते नहिचाक्षुषज्ञानंश्रोत्रेंद्रियकार्यं एवमगृह्यमाणस्वभावाव्यक्तयः शब्देनाभिधानवेलायांकेषांचिदेवसामान्यज्ञानभेदानांकाश्चनश

त्यरूपप्रत्ययानामभेदोपपत्तेर्हेतुतांव्यक्तयः।शष्टेप्रत्ययेशष्टार्थप्रत्ययानांसामान्यानांवस्तुतःसमवायोनयमाद्दृश्येषमावेदयंतीतिनसांकर्यंशष्टार्थस्य
र्थः।अगृह्यमाणस्यापतदानींव्यक्तिरूपस्यान्यदाप्रत्यक्षकालेगृहीतत्वात्।व्युत्पन्नसंबंधस्यापितद्विषयावसायादिरोधात्।संप्रत्यगृह्यमाणस्यादिदृष्ट
प्रतीतिविषयहेतुत्वमितिएतावतासामान्येनात्रेंद्रियाणिदृष्टांतः।केषांचित्सामान्यज्ञानेभेदानामित्यर्थक्रियाश्चनैवव्यक्तयइतिलक्ष्यते।तदेवंकेवलजात
भिधानपक्षःसमर्थितः।तद्दूषणमभेदेनसंकेतार्थत्वस्येतित्रेवक्रियायोगोपलब्धेः।शष्टव्याप्तयोक्तावोदनासुचतस्यारंभादिति।इदानींसर्वशक्त्यात्मभूतमेकस्येवे
ति।अत्रापिमतेजातिर्व्यक्तिरविभागमाह॥ ॥सत्यासत्योतुयोभागोप्रतिभागंव्यवस्थितौ॥सत्ययंसाजातिरसत्याव्यक्तयःस्मृताः॥३१॥ ॥अविद्याच
न्निरूपस्यभेदस्यसर्वपदार्थगमानुयायिनोसत्यत्वाद्व्यक्तिरितिव्यवहारः।तदेवहिसत्ययस्मिंस्तत्वंनविहन्यतइति।अन्वयिरूपभेदेशप्रत्ययेशब्दा
ध्यमानंप्रत्यसत्यंजातिरितिव्यवहृतमहैतवादिभिः।तद्यथास्तूचकस्वस्तिककुंडलाद्योविकाराःपरस्परोपमर्देनभवतोस्थिरप्रत्ययविषयाःसुवर्णमि
त्येवतुसमन्वयिविज्ञानादवसेयंसत्यत्वं।एवमभेदांतरविवक्षायांतेजइत्येवसत्यं।तत्राप्यभेदस्तत्कारणमित्यात्मापराभ्रक्षतिः।सत्यासर्वविकारानुयायि
नीप्रशांतकल्लोलाविद्रेकघनाब्धेरित्यागमविदः।तदुक्तं।दृष्टिर्विधतोकिंसत्यंविकल्प्यः।विकल्पेकिंसत्यज्ञानं।ज्ञानेकिंसत्यंब्रह्मेति।प्रतिभावमिति
परमतेनभावाद्वैतानावीक्षा।चित्सामान्यस्यानुगमादेवंमहासत्तारूपमभावप्रतियोगिविश्वस्यजगतःसत्यरूपमवदातदर्शनैःसाक्षात्कृत्यो
पदिष्टप्रमाणानस्तेभगवतः॥इत्यंचात्रहैतनयेपरमार्थसत्येकेवलजातिर्महासत्तारव्यापरब्रह्मस्वभावतस्यापएवगोत्वादिजातिभेदेनविवर्त्तेव्यवहार
इत्याह॥ ॥संबंधिभेदात्तत्रैवभिद्यमानागवादिषु॥जातिरित्युच्यतेतस्यांसर्वेशष्टाव्यवस्थिताः॥३२॥ ॥वक्ष्यमाणैराश्रयादिभिःस्वसंबंधिभिर्भिद्य

मानोपचितभेदागवाश्वादिषुसत्तैवमहासामान्यमेवजातिर्गोत्वाश्वत्वादिकाख्यापरसामान्यंनान्यापरमार्थभिन्नासाविद्यते।तथागोसत्तागोत्वंनापरमन्व
यिप्रविभासते।एवमश्वस्यसत्ताश्वत्वमित्यादिवाच्यं।तस्यामेवगवादिभेदभिन्नायांसत्ताख्यायांजातौसर्वेवादयोहित्यादयश्चाकाशादयश्चशष्टावा
चकत्वेनव्यवस्थिताइत्यसांकर्येणनियतोपाधिवशाज्जात्यभिधायिनःसिद्धाः।सर्वशष्टविषयत्वमेवाभिव्यनक्ति॥ ॥तांजातिपदिकार्थंचाप्यत्वर्थंचाप्र
चक्षते॥सानित्यासामहानात्मातामाहुस्तत्तत्सदात्मना॥३३॥ ॥सर्वभावेषुसदूपंसामान्यमनुगतंश्रुत्यावस्थापिबुध्याकारेणानिरूपणान्महासत्तयाविन
यावियोगात्।प्रातिपदिकमात्रवाच्यासत्तातुक्तं।प्रातिपदिकार्थःसत्तेति।अतोरथिसाधनाधिनलक्षजन्मसुक्रियाव्यक्तिषुसमवेतायथोपाध्युपगृहीत
नानात्वात्सत्तैवाभिधेयक्षयकमापद्यतेसिद्धसाध्यरूपार्थद्वयात्मनांचतस्याएवदृष्टेस्तदपरराश्यभावात्सर्वशष्टविषयत्वसत्तायाः।प्रत्ययभागेनाश्र
प्यत्रयथायंसंख्याकारकाद्युपाधिविशिष्टासत्तैवाभिधीयते।साचोदयव्ययरहितत्वान्नित्यासत्यत्वयस्यसर्वदानुवृत्तेःएतेसत्तामात्रस्यात्मनोमहा
तःषड्विशेषपरिणामायत्परंविशेषेभ्योलिंगमात्रमहत्तत्त्वंतस्मिन्नेतेसत्तामात्रेमहत्यात्मन्यवस्थायदृष्टिकाष्ठामनुभवंति।प्रतिसंरुध्यमानाश्चतस्म
न्नेवसत्तामात्रमहत्यात्मन्यवस्थायपयन्निःसंकासत्तासदसदव्यक्तमलिंगंतस्मिन्प्रतियंतीत्येवंविधिमत्यमहच्छब्दवाच्यमाद्यंजगत्कारणंनिर्दिष्ट
मित्यतानंतरस्यविकारणग्रामस्यकारणरूपानुगमात्सत्तारूपत्वमविरुद्धमितिसत्तारूपंसर्वजगदारभ्यातमिलितीतिसत्ताहैतवादः।सांख्यन
येनाप्युपरंहितः।एवंसर्वशष्टवाच्यासत्ताशष्टप्रवृत्तिनिमित्तभूतेतियथायद्यभिन्नोपाधिभावप्रत्ययाभिधेयासेवानन्येवंगोत्वमितिप्रकृतिप्रत्यययो
रेकार्थताप्रसक्तेरनेतदुपाधिभेदेनसत्तायाभेदात्।प्रातिपदिकेनगवाश्रयायास्तस्याश्चाभिधानप्रत्ययेनतुनिश्चष्टाश्रयस्यसामान्यस्याभिधेय
दोषःप्रकृत्यर्थनिमित्तभावप्रत्ययभेदइतिनसांकर्यप्रसंगः।यदुक्तम्।तांप्रातिपदिकार्थंचाप्यत्वर्थंचाप्रचक्षतइति॥एतदेवोपपादयितुमाह॥ ॥

॥प्राप्तक्रमविशेषेषु क्रियासेवाभिधीयते॥ क्रमरूपस्यसंहारेतत्स्वमितिकथ्यते॥३४॥ ॥क्रियावाचीक्षतुः सत्ववाचिनमेतमीयते॥ क्रियासत्तेवस्तुने
वातथाहि साधनपरिस्पंदवशात् क्रियाणांव्यक्तिस्थानीयानां विशेषशब्दवाच्यानांपौर्वापर्येणतद्गताविज्ञातियधीतथ्यतेनप्रतिभासनइतिसेवसा॥
रात् क्रियासकलधातुवाच्याविषयात्तस्याएवावांतरोक्तत्वर्थभेदइत्यनंतरमेववक्ष्यते॥साधनसंयुक्तहेतुकप्रतीयमानरूपायरामर्थस्तेनेवसत्वं॥
मितिउच्यतइतिसिद्धसाध्यरूपोहिक्षविवर्त्तः सन्मात्ररूपस्यपरब्रह्मणः प्रतिपादितः तदेवहिसर्वत्रानुगतमनचात्रदर्शनेसद्भिःसत्ताव्यतिरिक्ताभा॥
वइतिसर्वतन्मयंतत्तच्चसर्वशब्दानांसत्तावचनत्वाज्जातिपदार्थव्याप्तिः॥यद्यपिचद्रव्यपदार्थेपिब्रह्मद्रव्यस्याभिधानमुपाधिभेदभिन्नस्यवस्तुनि॥
थापितात्पर्यभेदाद्यवस्थाभेदः॥जातिपदार्थेसर्वत्रान्वयिरूपंजात्यात्मासर्वत्रब्रह्मविवर्त्तितद्व्यपदार्थनयेतुपरिशिष्टस्वरूपंपरमार्थतयेतिदर्श॥
नविकल्पः॥अयमेवचपक्षहृदयेप्येकपक्षीभावरूपः सिद्धांतः॥सर्वपार्षदरूपरमार्थदर्शनात्सर्वपार्षदत्वात्पुनरस्यशास्त्रस्यदर्शनांतरोपन्यासः॥एवंच
सर्वत्रैवास्यग्रंथकारस्याभिप्रायः॥पदार्थचर्चाविषयेब्रह्मदर्शननयेनैवसंक्षेपविस्तारेपिनिगमनात्॥इदानींसमग्रःक्रियाकलापः सत्ताविवर्त्तरूपे
तिनिरूपकारमतेनसंवादमाह॥ ॥सैवभावविकारेषुषडवस्थाःप्रपद्यते॥क्रमेणाशक्तिभिस्ताभिरेवंप्रत्यवभासते॥३५॥ ॥षड्भावविकाराश्चभवंतीतिहे॥
स्माहभगवान्वार्ष्यायणिरितिनिरुक्तकारः॥तत्रचभावस्यपरमार्थरूपस्यसन्मात्रकस्यजन्मादयोविकाराइत्यर्थः॥सन्मात्रस्वभावाहिसत्तोत्तरोत्तरविका॥
रापन्नोजायतेस्तिविपरिणमतेवर्द्धतेपक्षीयतेविनश्यतीति॥व्यपदेशमात्रादयति॥प्रथमकरणस्यसन्मात्ररूपमस्ति॥शेषेणनाभिधीयतेऽपितुशेषेणरका॥
लभावीतस्याश्चावस्थाविशेषः॥जन्मानंतरंभाविभिरूपांतरस्यालोकेसतिव्यवहार्य्यतेतः प्राक्पश्चाच्चाविद्यः पुनरवस्थाजन्मविपरिणामादिरूपेणचव्य॥
क्यार्थस्याकर्मविशेषाभ्यांसंपद्यतेमुखमितिं। एवंरूपस्यप्रतिषेधेनञाक्रियतइत्यन्ये। वाक्यार्थश्चसामान्येनवर्त्तमानानांपदानांविशेषेवस्थापकः
संबंधः। सचपदार्थविच्छेदकत्वादुपसर्जनंगुणइत्युच्यते। संबंधेचनिवर्त्तमानेप्रकृतिप्रत्ययार्थयोरपिसंबंधिनोनिवृत्तिप्रतीतिः। अत्रापिपक्षेप्रकृत्यर्थ
संबंधेननसोसमर्थसमासोस्मादेवज्ञापकाद्विधेयः। असमर्थ्यंचप्रकृतिप्रत्ययार्थसापेक्षत्वसामर्थ्यात्प्रत्ययार्थसंबंधेनेत्यदोषः। प्रधानंहितद्धत्यर्
थार्थः। प्रधानस्यसापेक्षत्वेपिभवत्येवहेतिः। अन्येत्वाहुः। प्रकृत्यर्थेत्रप्रत्ययार्थेप्रत्युपसर्जनत्वाद्गुणइतिभाष्यकारमतमुन्नीयते। तथाहि। नन्व
पूर्वादित्यत्रभाष्यकारेणोक्तं। आचार्यप्रवृत्तिर्ज्ञापयतिं। सर्वएवतद्धिताः सापेक्षाभवंतीति। यदयंनञोगुणप्रतिषेधेहेत्वादिकमाहेति। तथाहि। नञ्
योभावोर्थांतरमप्रश्लिमेति। प्रकृत्यर्थः प्रतिषिध्यतेनञा। तथाचासामर्थ्यान्नहितोनैवस्यात्। समर्थानांप्रथमादितिवचनात्। अतोज्ञापकेनायमर्थ
उक्तः। तत्रचप्रतिषिद्धस्ययथाऽर्थोभविः ऽर्थोवन्यिस्यभावइत्यर्थः। तथाप्रतिषिद्धाभ्यांकर्मविशेषाभ्यांसंपादिमुखंततोन्येनसंपादीत्येवंप्रकृत्यर्थेनि

DR BHAU DAJI

त्रः सबध्नादृदमवसीयते। प्रकृत्यर्थोगुणत्वेनभाष्यकारस्याभिमतइति। एतन्नयुक्तं। प्रधानाप्रधानसन्निधौप्रधानएवकार्ययोगइतिसंपद्यमानार्थविषयः प्रतिषेधःसंपन्नेयुक्तोनाप्रधानेप्रकृत्यर्थेएकपदोपात्तश्चार्थेतरगःसंसर्गीभवतीत्यतोपिसंपत्तिरेवगुणोयुक्तोनपदांतरोपात्तः। प्रकृत्यर्थोविप्रकृष्टः। ज्ञापकचक्षुर्याद्यनुवर्त्तकंनकारकंनत्रश्चप्रधनार्थेनाभिसंबंधेप्रकृत्यानस्यात्। समासोसामर्थ्यादितिज्ञापकेनप्रकृतेराश्रितसमासायाःप्रत्ययोज्ञापितोभाष्यकारेणात्र देवंपूर्वदर्शितएवसूत्रार्थोयुक्तः। अभेदिकमित्यहर्थितद्धितोत्रीदाहार्यः। अवसीयहितार्थअसापरायिकमित्ययमर्थेसंपरायायप्रभवतीतितद्धितः। अनयादिशाअन्यत्रापिगुणप्रदेशेयथाभाष्यसूत्रवार्त्तिकेषुगुणस्वरूपंव्याख्येयं। दिङ्मात्रमिहप्रदर्शितं। अतिशायनसूत्रेभाष्येप्रातिपदिकार्थेविद्रव्यान्तरद्रव्यस्यप्रकर्षपिकर्षयोस्तिः। एवंतर्हिगुणःप्रातिपदिकार्थः। ननुचद्रव्यमपिप्रकृत्यर्थः। तत्रकृतएकस्यगुणस्यप्रकर्षइति। तत्रेतदुक्तंयस्यास्तिप्रकर्षस्तत्रप्रकर्षेभविष्यतीति। उभयवैशप्रातिपदिकार्थइति। एतच्चिंतेनसंसर्गादिलक्षणोगुणोगृह्यते। इति। सहिद्रव्योपसर्जनभूतःशुक्लादिप्रातिपदिकेनप्रत्याय्यते। तत्रचगुणस्येवप्रकर्षपिकर्षयोस्तिः। नद्रव्यस्येत्यत्रकारणंवक्तव्यं। शष्टेनविनिष्पन्नरूपस्यद्रव्यवचनस्यापिप्रतिपादनात्। कारणापन्नगुणवत्कार्यद्रव्यमपिकथंनप्रकृष्येत। तथागुणःप्रतीयमानःकश्चिदभिधीयमानोन्यः। तत्राभिधीयमानगुणापेक्षएवद्रव्यस्यप्रकर्षइत्यत्रापिकारणंवक्तव्यं। एकस्मिन्नप्यर्थेबहुतरोपाधीनांसंभवनियमेनैकस्योपादानयुक्तं। सर्वत्रद्रव्यातिशायनास्पदंसगुणः सन्निधीयतइत्येतत्कथं। नहिगुणोपरोगुणोनिर्गुणागुणइतिवचनात्। सामान्येषुचावच्छेदकोनास्ति। निःसामान्यानिसामान्यानीतिसिद्धांतात्। तथाकर्मादिष्वपिनास्तिगुणइति। तत्रकिंनिबंधनःप्रकर्षोभवेत्। कथंचान्यस्मिन्प्रकृष्यमाणेन्यस्मिंप्रकर्षेयुक्तइत्येतदपिवक्तव्यं। नह्यर्जुनेशौर्येणचैत्रस्तथा। द्रव्यंचप्रकृष्यमाणंलोकःप्रत्येतिशष्टादित्येतद्विकल्पाक्रमेणनिवारयितुमाह॥ ॥द्रव्यस्याव्यपदेश्यस्ययउपादीयतेगुणः॥ भेदकोव्यपदेशायतत्रकर्षोनिधीयते॥२॥ ॥इहोपाधिविवेकेननिरूपयितुमेवनपार्यते। नहिसामान्यादिपदार्थंविनाध्रुवयितुमिदंशक्यते। तच्चस्वेनरूपेणनिरू-



पयितुमशक्योनशक्यते। तत्कथंस्वतःप्रकर्षेणयुज्यते। अतोव्यपदेश्यस्येतिस्वतःप्रकर्षाभावेसामानाधिकरण्यशष्टेनहेतुरुपात्तः। तदन्यसंसर्गधर्मातरानुप्रकर्षगुणादिनिरेवसंसर्गिभिर्विशेष्यमाणंद्रव्यंसजातीयात्प्रकृष्यते। तत्रसंसर्गिणोगुणाद्ययोबहवःसन्निहिताइतिकिंकृतोतिशयइत्याह। यउपादीयतेगुणोभेदकोव्यपदेशायेति। द्रव्यंव्यपदेष्टुंव्यवच्छेदकोनान्यस्माद्योगुणउपादीयतेशष्टेनगृह्यतेतत्कृतः प्रकर्षःप्रत्ययवाच्यः। नत्वभिधीयमानापरसन्निहितगुणादिनिमित्तकः। तस्यप्रतीयमानस्यानेकत्वान्नियमकारणाभावात्। प्रतीतेरुपप्लवमानत्वाद्दिरंगत्वात्। अभिधीयमानस्तुगुणोंतरंगोनियतप्रतीतिः। यदावशेनहिद्रव्यमभिधीयते। तदात्मनएवातिशय्यमानता। अन्यस्याप्रकृत्यर्थोपाधित्वादतिशयस्याभिधीयमानस्येवप्रकृत्यर्थत्वात्। गुणोभेदकइतिस्वशास्त्रलक्षितगुणस्वरूपमत्रगृह्यते। इत्याह। संसर्गभेदकंयद्यदिनिर्दिष्टलक्षणंभेदकत्वेचात्रमुख्यंगुणलक्षणं। असमवेतस्यापिदंडस्यदंडिनिगुणत्वात्। अवयवद्रव्यव्यवच्छेदेनतदेवशुक्लतरःपटइति। शुक्लगुणनिमित्तोद्रव्यप्रकर्षोनगरिमादिप्रतीयमानगुणनिमित्तः। यथानिरुपाधिनोद्रव्यस्यप्रकर्षोनास्ति। तथाद्रव्यान्तरशष्टस्यस्वतंत्रगुरुगुणस्यापिशुक्लतरंरूपमितिस्वतःप्रकर्षोनास्ति। अथितदवस्थायांद्रव्यमानत्वंगुणस्यापरसंसर्गिधर्मांतरनिमित्तएवप्रकर्षइत्याह॥ ॥सर्वस्यैवप्रधानस्यनविनाभेदहेतुना॥ प्रकर्षोविद्यतेनापिशष्टस्योपैतिवाच्यतां॥३॥ ॥गुणोपिप्राधान्येनशष्टेनाभिधीयमानोद्रव्यलक्षणमिदंतदितिसर्वनामप्रत्यवमर्शयोग्यस्वभावमनुपतंतीतितस्यनिरुपाधेर्व्यपदेशाविषयत्वाद्यउपाधिर्व्यपदेशस्तन्निमित्तएवप्रकर्षः। तत्रजातिर्व्यपदेशहेतुरपिप्रकर्षेसचारा। समानजातीयाधिप्रकर्षः। तत्रजातेरभेदः। अतएवोक्तंभाष्येजननेनप्राप्यतइतिजातिः। नचेतस्यार्थस्यप्रकर्षापकर्षोस्तइति। जन्मकालसंबंधाज्जातिर्नतूत्पन्नेद्रव्येकारणांतरसन्निधानायत्तोनिवेशोयस्याः। येनकारणभेदात्शुक्लादिवत्रकृष्येत। तस्मान्नित्यत्वाज्जातेर्नास्तिसावस्थ्या। याजातिर्यूनेतिजन्मकालेपितेनैवरूपेणासाव्यवस्थिता। व्यक्तेरपियोगेनप्रवर्त्तमानाअतज्जातीयाएवव्यवच्छेदंशपयितुंशक्नोतीत्यर्थः। अतश्चजातेरतिशयितत्वासंभवान्नदेको

यसमवायिभास्वरत्वादेर्भेदव्यवहारो भिन्नतेत्येवमादयो विशेषाः। प्रकर्षनिबन्धनाय यद्यपि चाग्निसंयोगादेरास्तत एव गुणस्य प्रकर्षो भवति। तथापि व्यपदेशः परोपाधेरेवेति तन्निमित्त एव प्रकर्षो न्याय्यः। न हि स्वगतो विशेषः शब्देनसर्वः शक्यते भिधातुं रूपादिशब्देन रूपत्वादिजातीयस्याविशेषेणासर्वस्याभिधानात्। एवं शुक्लादिविशेषशब्दानामपि शुक्लजातीयस्याविशेषेणाप्रतिपादनात्। अतएव भास्वरत्वादयोपि बाधान्येनव्यपदिश्यन्ते। तदायत्राश्रितधर्मद्वारक एव प्रकर्षो विज्ञेयः। भास्वरतर इति। तत्राप्यधर्मनिरस्य प्राधान्यादयाश्रितधर्मनिमित्त एव प्रकर्षइति। यावत्संभवति शब्दव्यापारस्तावदपर्यवसानमेव धर्माणामिति गुणा प्रकर्षहेतुर्यः स्यात्तेनोपदिश्यते। तस्याश्रिता गुणादेव प्रकृष्टत्वं प्रतीयतइत्युक्तमेवाश्रय एव सर्वस्यैव प्राधान्यस्येति व्याख्यातम्। सर्वग्रहणेन। यद्यपि तु शब्दव्यापारोपरमस्तदाधर्मान्तरमपर्येषणापर्यवस्यति। ननु च भास्वरत्वादयः शुक्लशब्देनवाच्या इति शब्दवाच्यप्रतीयमानधर्मद्वारकोत्र प्रकर्षोनिकोपाधिसन्निधय। नादनियमः प्रसज्येतेत्याशंक्याह॥ ॥विद्यमानाः प्रधानेषुनसर्वेभेदहेतवः॥विशेषशब्दैरुच्यंतेव्यावृत्तार्थाभिधायिभिः॥४॥ ॥इह प्रधानेषुवस्तुषु तोन्यस्मान्नजातीयविजातीयाद्यवच्छेदहेतवोधर्माः। तेचनसर्वेकेनचिच्छब्देनशक्यंतेभिधातुं। अनेकव्यावृत्तिनिष्ठस्यैकशब्दस्येवाभावात्। एकैकव्यावृत्तिनिष्ठा। हिबहवः शब्दावस्तुनिप्रवर्त्तंते। तथाचतत्रविशेषशब्दइत्युच्यंते। प्रतिनियतविशेषाभिधायित्वात्। यदिहिसर्वविशेषविशिष्टंद्रव्यमेकेनशब्देनाभिधीयते। तस्मादसावेकः साधारणः। नचैवंतस्मात्प्रतिनियतव्यावृत्तिविशिष्टार्थाभिधायिभिः शब्दैः सर्वविशेषाणामसंस्पर्शात्। उपादानहेतुकएव प्रकर्षः। सूक्ष्माणांचविशेषा। णामसंविज्ञानादानाभास्वरत्वादीनामस्त्येवशुक्लादिशब्दैर्वचिता। तदुपाधिविविक्तस्यशुक्लस्यप्रधानस्यशब्दविषयभावोपगमायोगात्। संसर्गिरूपाहितत्वाच्छ ब्दस्याजातिरूपप्रकर्षमभिदधच्छुक्लतररूपमित्यादिप्रयोगदर्शनाच्चात्रभास्वरत्वादिहेतुकः प्रकर्षोनिश्चीयते। नवाशब्दवाच्यधर्मनिमित्तः। सः। श्रुतिप्रसंगा दिति। भास्वरत्वादीनामपिप्रयोगप्रामाण्यादत्रशब्दवाच्यत्वंनिश्चीयतां। ननुभवतुस्वतोव्यपदेश्यस्यधर्म्यस्यससर्गिधर्मनिमित्तोव्यपदेशप्रवृत्तिः। तत्रैवतु व्य

७१

॥पदेशसंसर्गिणउपरुध्यात्। प्रकर्षेपिकथंतस्यव्यापारः कल्प्यतइत्याह॥ ॥वस्तूपलक्षणेयंतत्रविशेषोव्याहृतोयदि॥प्रकर्षोनियमाभावात्तस्माद्विज्ञानहेतुकः ॥५॥ ॥वस्तुनिर्देशमात्रेचरितार्थत्वेविशेषस्योपाधिभूतस्ययःशुक्लोदृष्टःसागरिमादिनाप्रकृष्टःशुक्लतरइतिप्रतीयते। तथाचविशेषः प्रकर्मस्यनिबंधनमुक्तं। यते। नचैवंप्रसिद्धशुक्लगुणनिमित्तस्यैवप्रकर्षस्याभावोपगमात्। ननश्चयथाप्रतीतिर्यथाचयुक्तिः। प्रत्यासन्नतरत्वाच्छब्दवाच्यस्येति। तथाप्रकर्षेव्यपदेशहेतोरेव विशेषस्यव्यापारः कल्पयितुन्याय्यइत्यर्थः। इहकथंप्रकर्षप्रत्ययः। निकृष्टतरः। प्रकृष्टतरइत्याह॥शंक्याह॥ ॥सर्वत्रसर्वतोवश्यंनियमेनप्रकृष्यते॥ससंर्गिणा। निमित्तेननिकृष्टेनाधिकेनवा॥६॥ ॥व्यपदेशहेतुप्रकर्षेप्रकर्षप्रत्ययइतिनिकृष्टोपाधेरपिसन्निधानेसन्निकर्षादेरुएव प्रकर्षोवाच्यः। प्रकर्षोपाधेश्चाभिधाने। प्रकर्षादेरुइतिसजातीयापेक्षायासर्वस्यप्रकर्षसंभवादेतदुपपद्यते। निकृष्टस्यनिकृष्टादेव प्रकृष्टस्यप्रकृष्टादेवातिशयःसंभवत्येव। एवंगुणप्राधान्येप्य। परधर्मनिमित्तस्तत्राधान्येप्यपरधर्मनिमित्तः प्रकर्षइत्यनवस्थांपूर्वमदर्शितामप्यनेनाह॥ इहगोतरेतिप्रयोगोदृश्यते। तत्रचजातिनिमित्तः प्रकर्षइत्युक्तं। नचात्रनिमित्तांतरमस्यसव्यापारंप्रतीयतइतिनिर्निमित्तः प्रकर्षोद्रव्यस्य। एवंशुक्लतरादावपिभविष्यतीतिकिमितिगुणहेतुकः प्रकर्षः समुद्दीष्यतइत्याशंक्याह॥ ॥नापेक्षतेनिमित्तंचप्रकर्षेव्याहृतंयदि॥द्रव्यस्यस्यादुपादानप्रकर्षप्रत्ययनार्थकम्॥७॥ ॥परिनिष्ठितरूपद्रव्य।भनिर्भासोपचयसंबंधयोग्यस्वतइतिन स्वनिमित्तंप्रकर्षमनुभवति। तद्यदुपाधिनिमित्तंप्रकर्षेसव्यापारंनांगीकरोति। तदाप्रकर्षप्रतिपाद्यतस्योपादानंनिःप्रयोजनं। शुक्लतरइत्यादिप्रयोगएवनस्यादित्य र्थः। तस्मात्प्रयोगप्रामाण्याद्यथोपपत्तिप्रकर्षोतुविधेयइति। व्यपदेशहेतुस्वससर्गिधर्मनिमित्तः। सव्यवस्याप्यः। सर्वत्रजातेर्व्यपदेशहेतुभूतायास्तदसंभवेय थाशुक्लतररूपमित्यत्रैकार्थसमवेतभास्वरत्वादिधर्मद्वारकः प्रकर्षोव्यवस्थाप्यते। तथागोतरेत्यत्राप्येकार्थसमवायाद्वाभेदादेर्द्रव्यादिसीव्यवस्थाप्यः। भा। स्वरत्वादेवचात्रप्रयोगप्रामाण्याद्दाहदोहादेरपिशब्दार्थत्वमध्यसेयं। ततश्चप्रकर्षप्रकर्षाभ्यांदोहागोर्गोतिरेतिभण्यते। इतिसर्वमुस्थं। प्रकरणार्थसमापय

नूविशेषेणाह॥ ॥सव्यापारोगुणास्तस्मात्स्वप्रकर्षनिबंधनः॥ऽव्यात्मानमभिनत्त्येवंस्वप्रकर्षनिवेशयन्॥८॥ ॥ऽव्यस्यस्वतोनिरतिशयत्वात्स्वेनाभिन्नभूतव॒
प्रकर्षापादनाद्युक्तःसंसर्गिगुणःस्वातिशयहेतुःकेनविशेषणोनआश्रयान्तरावच्छेदंविदधाति।कथमन्यस्यप्रकर्षेन्यःस्याप्रकर्षइत्याशंक्याह॥ ॥अरूपपर
रूपेणाऽव्यमाख्यायतेयथा॥अप्रकर्षप्रकर्षेणगुणस्यापीष्यतेतथा॥९॥ ॥इतिवाक्यपदीयेगुणसमुद्देशः॥ ॥नीरूपस्यनिरुपाधिनाऽव्यस्यशाष्टव्यव॒
हारोपनियमितशरीरऽइत्यर्थः॥गमायोगाऽपाधिरूपाच्छुरितस्यतदुपगमेसदृशएवार्थएवातिव्यवहारः॥सोपाधिनियमितशरीरऽइत्यर्थः॥उपाध्युपाधिमतोश्चवि
वेकस्यदुरवधारत्वात्संकरऽइतिव्यवहारेगुणप्रकर्षेगुणिनिविश्राम्यति॥गुणात्मन्येवनिरूढगुणिनिव्यवतिष्ठते॥नापिगुणात्मन्येवनिरूढगुणऽइतिसिद्धम्॥
॥ ॥इतिभूतिराजतनयहेलाराजकृतेप्रकीर्णकप्रकाशेगुणसमुद्देशःपंचमः॥ ॥२२४॥ ॥श्रीगोपीजनवल्लभोविजयतेतराम्॥ ॥संप्रत्येकयोगक्षेमत्वात्य
दार्थांस्त्रेणोद्दिश्यक्रमेणविचारयितुमाह॥ ॥दिक्साधनक्रियाकालऽतिवस्त्वभिधायिनः॥शक्तिरूपेयदार्थानामत्यंतमनवस्थिताः॥१०॥ ॥दिगादिशब्दा॒
र्थस्यसिद्धस्वभावऽव्यधर्मतयास्वार्थंप्रतिपादयंतोयथालक्षितविभागाद्यर्थसंस्पर्शिकव्यः॥तथाहि।परोपाधिरूपाःशक्तयोदिगाद्याः॥पारतंत्र्यंचशक्तिल
क्षणमिति।क्रियापिऽव्यपरतंत्रा॥शक्तिरितिव्यपदिश्यते।वैशेषिकनयेचदिक्ऽव्यंनोपपद्यते।कार्यानुमेयत्वेनपदार्थोपकारकरूपस्यशक्तित्वस्यन्याय
यत्वात्॥एवंविधशक्तिस्वरूपंस्वसिद्धस्वभाववस्तुवाचकैःशब्दैःसाक्षान्नस्पृशतऽत्यसाधारणमेतत्पदार्थरूपंलक्षणेनावस्थापयितव्यं॥अस्मिन्हेषाशास्त्रे॒
स्मिन्व्यवहारेदिक्शब्देभ्योदिग्देशकालेष्वित्यादि॥तत्रसाधनादीनांशास्त्रानुमितमेवलक्षणंविभजनीयं।दिक्कालादीनांतुस्वरूपंवक्तव्यं॥तत्रदिशश
स्त्रावदनुमानेनस्वरूपंलक्ष्यते॥ ॥व्यतिरेकस्ययोहेतुरवधिस्तत्प्रतिपाद्ययोः॥ऋत्विग्जेवयतोन्येनविनाबुद्धिःप्रवर्त्तते॥२॥ ॥कर्मणोजातिभेदानामभिव्य॒
क्तिर्यदाश्रया॥साश्वेरूपाधिभिर्भिन्नाशक्तिर्दिगितिकथ्यते॥३॥ ॥इदमस्मात्पूर्वंपश्चादित्येवमस्मादित्यवधेरिदमितिप्रतिपाद्यस्यचावधिगतोयोव्यतिरेकः॥

प्राप्तयादिक्कार्थभेदोवध्यवधिमत्संबंधलक्षणंस्वपदार्थस्वरूपादनुपपद्यमानोनिमित्तांतरमावेदयतेतन्निमित्तांतरंदिगित्युच्यते॥नहिक्ष्मात्वादिनिमित्तोयंप्रत्ययः॥
तदनुरागाप्रतीतेः॥परिशेषान्निर्निमित्तःयदाऽऽर्वैशेषिकाः॥तऽतःऽदमितियतस्तद्दिशोलिंगमिति।कार्यकल्प्यत्वेचसदेवपदार्थोपाधितयाप्रतीयते॥स्वतंत्रऽ
व्यरूपतानास्तिदिशः॥नहिपृथिव्यादिवत्दिगुपलक्ष्यते॥अतएवकालोपिशक्तिरितिवक्ष्यते॥समवायश्चतांशक्तिमितिसमवायाख्यामित्युक्तः॥तथाऽऽह्वः श्रेष्ठोयवश
ऽतिप्रत्ययोन्येनविनावर्धेरयनवेक्षणात्॥पृथिव्यादिनिमित्तांतरोपकारकमंतरेणाऽऽयते॥सचैकदिक्क्रमवयवानांप्रसारणादितिदिङ्निमित्तः॥ऽऽख्यर्थस्यो॒
पलक्षणार्थत्वात्॥चक्रादिबुद्धिरपिदिङ्निमित्तावाख्येया॥तथाकर्मलक्षणानातिर्यगूर्ध्वमधश्चऽऽयमानानांकर्मत्वमाह॥सामान्यव्यतिरेकेणभ्रमणत्वोर्ध्वपणत्वादिऽऽ
तिव्यक्तिर्दिङ्निमित्ता॥तथाह्यूर्ध्वादिदिक्संयोगविभागकार्याःकर्मलक्षणाविशिष्टाःसतोनियतऽऽत्यभिव्यंजनसमर्थाभवंति॥कर्मणऽतिःकर्मसामान्यावांतरऽऽ
तिभेदाऽर्ध्वपणत्वादयः॥ऽऽताचैकवचनादिश्रवणादिलक्षणानांयेऽऽतिभेदाऽत्यर्थः॥दिग्गादिशोदिशोद्दिशोलिंगाभावाच्चैकादिगितिकाणादाः॥एकाचिद्दिङ्नि
यतोपाधिप्रकल्पितानानानादेशाध्यवस्थियतेतथाचएवमाऽऽः॥आदित्यसंयोगाऽत्यर्वाऽविप्रतोभूताच्चप्राचीति॥सवितुरहरादेर्योयेनप्रकल्पितदिग्देशेन
संयोगोभूऽविष्यतिभवतिवातस्मादादित्यसंयोगात्प्राचीतिव्यपदेशः॥अञ्चतऽतिऋत्वादक्षिणाप्रतीच्युदीचीचेतिसूत्रं॥अस्मादेवादित्यसंयोगात्प्रतीच्यादित्यप
देशः॥तथाहि।यत्रप्रतीपमंचत्यस्तगमनाऽविः॥साप्रतीची॥मूर्त्तिपरिच्छिन्नेनह्यादित्यमंडलेनयःसंयोगःसपरिमितदेशव्यापी॥तेनचातीतेवर्त्तमानेभविष्यति
चावच्छिन्नोभागोनियतदिग्भागव्यवस्थापकोभवतीत्यदृश्यमानगमिक्रियोपियांपरिहरति॥दृष्टकरणेन॥दक्षिणायानपरिहरति॥साऽउत्तरामध्याह्नेहिरविबिंब
मुदङ्मुखमंचति॥अतोसावुदीचीत्यपिभण्यते॥अनेनैवप्रकारेणपूर्वदक्षिणादीन्यतरालरूपाण्यपिदिगंतराणिव्याख्यातानीत्युक्तं॥सूत्रं॥एतेनदिगंतराणिव्याख्यात
नीति॥तथाहि।मेरुप्रदक्षिणमावर्त्तमानस्यसवितुर्लोकपालपरिगृहीतप्रदेशसंयोगापेक्षोदशधाविभागऽतिशास्त्रांतरेविस्तरेणनिरूपितः॥ततएवावधार्योऽह

त्वनूद्यते। परादिगादितनावभेदकथ्यते। नचायमस्याउपचारतोभेदोयतउपचारस्यप्रत्ययधर्मत्वान्नदर्शनःसमावेशेसूर्यसंयोगादविशेषतुसहकारिणमपेक्ष
विचित्रकार्यंभावयतीतिकल्पनयाभेदोपिदिशोव्यपदिश्यते। अतएवचवास्तवेपिभेदेवश्यंसहकारिणोपिव्यंजकत्वेनापेक्ष्याः। ततएवकार्यभेदोपेक्षिष्यतइति
तस्यान्यथानुपपन्नेर्दिशएकत्वमुपेयते। कोहिप्रामाणिकःकार्यस्यभेदमुपगच्छन्कारणानानात्वंप्रत्याचक्षीत। वास्तवेचदिशोनानात्वेसर्वत्रकार्यदर्शनात्ता
साविभक्ताःपूर्वापरादिप्रत्ययायःसकार्यैरनुतइत्यस्माद्भावतएकादिकःकार्यविचित्र्यानुसहकारिभेदादित्युक्तं। नवसहकारिणएवदिगानपेक्ष्याकार्यंयुक्तं। तस्य
स्वतोपूर्वापरादिभावस्यदिक्संबंधकृतत्वात्। नचतदनुरूपंकारणमितिदिगप्रत्याख्यायापूर्वापरादिप्रत्ययलिंगादिकालश्चेतियोरन्यत्वेलिंगस्यविशेषमा
ह॥ ॥परापरत्वेमूर्त्तीनांदेशभेदनिबंधने॥ ततएवएकत्वेतत्क्रमरूपेतुकालतः॥४॥ ॥मूर्त्तिरसर्वगतद्रव्यपरिणामभेदाध्यवसायाच्चधर्मिणोत्रनिर्दिष्टाः। व्या
पकानामाकाशादीनांपरत्वापरत्वेनपूर्वापरव्यपदेशःसंबंधनिमित्तः। व्यवहारदेशस्यापिपूर्वपरत्वंदिङ्निमित्तमिति। ततएवदिशः
परत्वापरत्वेदेशनिमित्तेनाव्यर्पितः। पूर्वमेतद्भविष्यतिपरमितितुकीडाशक्तिपोर्वापर्यंकालशक्तिकृतप्रतिबंधभ्यनुज्ञावशात्प्रत्यवतिष्ठतइतिनास्तिदिक्काल
योर्लिंगसंकरइत्याशयः। अमूर्त्तीनामपिकाल्पनिकेपरत्वापरत्वेस्तइत्याह॥ ॥आकाशस्यप्रदेशेनभागैश्चान्येःपृथक्पृथक्॥सासंयोगविभागानामुपाधित्वा
यकल्पते॥५॥ ॥संयोगिधर्मभेदेनाकाशस्यदेशविभागउक्तः। तथाचमूर्त्तस्यसंयोगेनप्रदेशप्रतिनाकल्पितोयःप्रदेशआकाशस्यतेनसहकर्मद्रव्यगतैरव्याहत्ति
त्वाद्यथायथंसंयोगविभागास्तेषांदिगवछेदायपूर्वापरादिभिन्नःप्रभवतीति। तदुपाधिप्रदेशानामाकाशस्यकल्पितात्मनांपूर्वादिव्यवहारः। तथाचपूर्वाकाशसंयुक्तः
पूर्वःपराकाशयसंयुक्तःपरइत्यादिमूर्त्तेषुव्यवहारःसिध्यतीत्यमूर्त्तपूर्विकासावित्यर्थः। इहदेशानादिकृतापूर्वापरादिव्यवस्था। दिशस्तुकिंकृता। अथतरनि- ७३
मित्तत्वेतस्यापिकुतइत्यनवस्था। दिशःस्वतएवपूर्वादित्वेदेशैरपिकिमपराद्भिरित्याशंक्याह॥ ॥दिशोव्यवस्थादेशानादिग्व्यवस्थानविद्यते॥शक्तयःखलुभावा।

नामुपकारप्रभाविताः॥६॥ ॥यदेशानांस्वतन्त्रस्वरूपमाधारादस्वरूपमवधीयतइततत्रपूर्वापरादिभावस्यस्वरूपादेवाभावादन्यन्निमित्तंदिगाख्यंकल्प्यते। दिक्कृ
तेनैवोपकारेणतत्रपरतंत्रस्वभावकल्पननानापरापूर्वापरादिनावत्स्वभावमवलंबितुमुत्सहते। येनतत्रावस्थितेस्वभावेदेशवत्पूर्वापरादिभावार्थंनिमित्तां
तरमेषणीयस्यात्। यादृग्वाहिसाकार्यपरिकल्प्या। तदेवतत्वनापरापरतंत्रशक्तीनापारतंत्र्यस्यैवोपपत्तेः। शक्त्यंतरकल्पनेशक्तिमत्ताप्रसंगाः
त्। सूर्यसंयोगास्तुपूर्वापरादित्वेनापूर्वापरादित्वेनापूर्वतंत्राधत्ते। अपितुस्वभावमेवाभिव्यनक्तीत्यभिप्रायः। शक्तित्वमेवास्याः स्वतंत्रभावस्वरूपतायाः करणा
यपोषयितुमाह॥ ॥प्रत्यक्षरूपाभावेषुकदिक्पूर्वेत्यभिधीयते॥ पूर्वबुद्धिर्यतोदिक्षासमाख्यामात्रमन्यथा॥७॥ ॥प्रत्यक्षमुपाधित्वेनभावेषुसमारोपितंरूपमस्य
स्यास्तथाभूतापूर्वादिगितिव्यवह्रियते। यतोयस्याःसकाशात्पूर्वबुद्धिःपूर्वोयमर्थइतिज्ञानंपूर्वत्वमुपलक्षणं। परत्वादेरपिगृह्यते। दिक्तापरोपाधिरूपेत्यर्थः
अन्यथाउपाधिरूपानपेक्षायांस्वतन्त्र्याश्रयणेभावतोदिङ्भवति। अपितुसदातनीसमाख्यामात्रंदिगिति। स्वतंत्रशब्दव्यविषयशब्दमात्रंवस्त्वासंस्पर्शि। तथा
ह्युक्तं। दिक्साधनक्रियाकालइतिवस्त्वभिधायिनः। शक्तिरूपेपदार्थानामत्यंतमनवस्थिताइति। तदेवनित्यपारतंत्र्यादिशः कार्यैकप्रत्यायत्वंस्वतंत्रपदार्थगत
विकल्पानवसरइतिस्वतोनानास्वभावत्वेसहकारिसूर्यसंचारिविशेषेणकिमेकस्वभावत्वेसहकारिभेदोद्योयेनविचित्रकार्यंकुर्यादित्येतदशक्यंवक्तुं। यथाहि। पूर्वा
परादिप्रत्ययजनकेनकार्येणानुमितसत्ता। तथाभ्युपगंतव्याशक्तिरूपादिक्। ननुचपूर्वापरादिप्रत्ययःसन्मुखत्वादिनिमित्तोभविष्यति। यथोक्तंभारते। यथा
भिमुख्यंभरताःप्रविशंतिसापूर्वादिङ्मंतव्या। नतथालोकेभिमुखस्थःपुरोवर्त्तीभण्यते। दृष्ठतःस्थितःपश्चात्स्थितइत्युच्यते। तथाहस्तदक्षिणःपथाहस्त
वामइत्यादिव्यवहारः। स्वांगनिमित्तइतिनास्तिदिक्कल्पनानिमित्तमित्याशंक्याह॥ ॥स्वांगाद्यवस्थयालोकेनतस्यानियतादिशः॥प्रत्यङ्मुखस्ययत्पश्चात्तु
रस्तान्नद्विपर्यये॥८॥ ॥स्वांगमुखमवधिमपेक्ष्यापूर्वादिव्यवस्थातत्रदिशोनियतानव्यवतिष्ठंते। पश्चान्मुखस्ययदस्तुपश्चादभूत्तदेवाग्रमुखंतेचतस्यपूर्व

स्मिन्देशे भवंतीति प्राङ्मुखउदङ्मुखोवा मुंडीतेति व्यवस्थानस्यात्। तस्मादनादिरूढादिडिमिन्नपूर्वापरावस्थांगीकाया। कांचित्तु दिगनपेक्षापि पूर्वापरादिदेशनिरूढेत्याह॥ ॥देशश्चावस्थानियमोदिक्षुनव्यवतिष्ठते॥रूढमप्ययरत्वेनपूर्वमित्यभिधीयते॥९॥ ॥दिक्षुदिडिमिन्नकःपूर्वदेशदक्षिणापश्चोत्तरापरादीनांनियमोनव्यवस्थितः। तथाहि। दिगपेक्षयापाश्चात्योपिपूर्वदेशइतिव्यवह्रियते। तथाचदक्षिणापश्चात्पूर्वदेशंगछन्पूर्वदेशंगछामीतिब्रूते। दिगवस्थायांतुसउत्तरोभवति। तस्मात्पूर्वादित्वमत्रदिगनपेक्षंसरूढं। अदिगपेक्षायांतुयथायथंव्यवहारेचाप्युपपद्यते। तथाचेहकस्मान्नभवति। पूर्वस्मिन्देशेवसतीति॥ भाष्येचोदयित्वानैषदोषोदेशविशेषणमेतदितिपरिहृतं। नायंपूर्वशब्दोरूढित्वादवध्यपेक्षःप्रवृत्तः। तेनदिक्शब्दःसन्देशेवर्त्तते। देशसामान्येतुदेशंशब्दादेवगम्यमानंविशिनष्टि। ततोदिक्शब्दाद्विधीयमानःप्रत्ययोनातोरूढाच्छब्दाद्भवतीतिभाष्यार्थः। केचिद्वाचक्षते। नायंपूर्वशब्दोयंदेशरूपेणाकथयति। देशशब्देनैवतस्याभिहितत्वात्। सदेशाधिकरणास्तुकस्मिंश्चिद्विशेषेदेशशब्दाद्प्रतीयमानःपूर्वशब्देनाभिधीयतेविशेषावच्छेदनिबंधनइति। एतदयुक्तं। देशसामानाधिकरण्यादेशब्दान्निभ्यःप्रत्ययस्येष्टेः। अवश्यंहिदिक्कालयोर्व्यवच्छेदार्थंदेशशब्दउपादातव्यइति। तत्रप्रत्ययाभावेकोविषयःस्यात्। तदेवंपूर्वदेशोदक्षिणापथइत्यादावनन्यापेक्षेरूढेपिपूर्वादित्वेसहजैर्निर्भिन्नमर्यादंपरस्परतोभवतिभवति। यथास्वांगनिमित्तेनव्यवहारोदिडिमिन्नोन्यथाव्यवहारइति। मुख्यदिडिमिन्नमेवपूर्वादित्वमित्युपपादितं। तथाचदिग्व्यापारोपाधिकापूर्वादिनाप्रवृत्तिः। देशेतुदिक्संबंधइतिभाष्येणसंपादयति॥ ॥अतोभाषितपुंस्कत्वात्पुंवद्भावोविधीयते॥अस्मिन्नर्थेनशब्देनप्रसवःक्वचिदुच्यते॥१०॥ ॥दक्षिणोत्तराभ्यामतसुजित्यत्रकिमर्थंनसुजेवक्रियतां। एवंस्वरार्थश्चकारोनकरिष्यते। प्रत्ययस्वरेणोवसिद्धेः। तदुक्तं। लिंगविशिष्टपरिभाषयादक्षिणाशब्दादयंभवति। तत्रासत्यकारेयस्येतिलोपोनस्यादिति। अत्रप्रत्ययस्याकारमाश्रित्यलिंगविशिष्टपरिभाषयाटाबंताभ्यांविधावसत्यकारेयस्येतिलोपाभावादक्षिणात्तरइतिरूपंनसिध्येदिति। सत्यकारेत्वाकारलोपेनतथाकारः श्रूयेतेतिप्रयोजनमुक्ता

पुंवद्भावेनासद्भावितपुनरादेयनासध्यति। भाषितपुंस्कस्यपुंवद्भावः। नचैतौभाषितपुंस्कावित्युक्तं। पुनरादेयनानुचैतावप्यभाषितपुंस्कौ। दक्षिणोत्तरइति। पुमान्भाष्यतइतितत्तुल्यसमानाधिकरणौभाषितपुंस्कस्यपुंवद्भावइत्याशंक्यांतरेचैतौभाषितपुंस्कौ। दक्षिणोत्तरेतिदिक्शब्दौ। दक्षिणोत्तरइति। व्यवस्थाशब्दौवितितदेतद्रूढिशब्दत्वेदिशिपूर्वादिनायुज्यते। नान्यथा। तथाहि। अयमर्थः। भाषितःपुमान्यस्मिन्पदार्थेसआश्रीयते। सचाभिधेयोनोपपद्यते। तस्यपदार्थस्यात्मास्वभावइत्यंततोव्यपदेशेनभाषितपुंस्कताव्यभिचारात्किमनेनंव्यवच्छिद्यते। तस्मान्प्रवृत्तिनिमित्तलक्षणोर्थोन्यपदार्थः। तत्रापिनिमित्तेप्रवृत्तिनिमित्तेसवित्रैवभाषितपुंस्कता। अतोर्थस्वभावादिशब्देनेति। अतएकस्मिन्प्रवृत्तिनिमित्तेसामर्थ्याद्भाषितपुंस्कता। समाश्रीयते। अर्थेचकार्यस्यासंभवादभिधेयधर्मेणतद्वचनःशब्दोभाषितपुंस्कइत्युच्यते। इत्याचक्षतेइतिप्रवृत्तिनिमित्तस्यान्यपदार्थत्वंसमानायामाकृतौयोभाषितपुंस्कःशब्दस्तस्यपुंवद्भावइत्यर्थोवितिष्ठते। दिशिचदक्षिणोत्तरेतिस्वाभाविकत्वादभिधानस्य। अस्मिन्दिग्दक्षिणोर्थेप्रसवः। पुंस्त्वमाभ्यांशब्दाभ्यांनक्वचिद्विषयेभिधीयते। अपितुदिडिमिन्नायांदेशेअनयोर्वृत्तिस्तदाव्यवस्थाशब्दोप्रवर्त्यमानंधनः। परस्परापेक्षत्वात्स्थितिर्व्यवस्था। दक्षिणाशैलाभोगइत्युक्तेकुतइत्यवधिप्रतीतिः। तत्रचेतौभाषितपुंस्कावित्याहत्यंतरेभाषितपुंस्कत्वादेकस्मिन्प्रवृत्तिनिमित्तेतद्भावात्पुंवद्भावोनभवति। अत्रासौसर्वनामोवृत्तिमात्रेपुंवद्भावइत्योपसंख्यानिकंपुंवद्भावमाश्रित्यटाबंताभ्यामपिदक्षिणोत्तरशब्दाभ्यामतसुचोकारंविनापिसिद्धेः। षष्ठ्यतसर्थप्रत्ययेनेतिविशेषणार्थोकारोव्यवस्थापितः। अत्रतुचोदितं। ननुदक्षिणोत्तरेत्येतावपिव्यवस्थाशब्दाविति। अयमर्थः। उत्तरापूर्वेतिचोक्तं। कुतःपूर्वतश्चोत्तरेत्यवश्यमवधिरपेक्षणीयः। विनानेनस्वार्थसंभवात्। तथाचोद्दिश्याप्यवधंतेपश्चात्पूर्वादिशब्दानांप्रवृत्तेस्तत्रापिव्यवस्थाशब्दत्वमित्येकस्यांव्यवस्थाकृतावस्त्वेवभाषितपुंस्कंचकेवलंपरोपाश्रयत्वाद्दिशिदृष्टेर्देशशब्देभ्योदिक्शब्दाभिधेयते। अतःपरमुक्तं। दिक्शब्दैकार्थ्यमेवनप्राप्नुवंतीति। नामधेयत्वेनदिशामप्रवृत्तेर्नैतेदिक्शब्दास्युरित्याशयः। तत्रोत्तरं। दिशो।

यदाव्यवस्थावच्छेतायदेतद्योदिशवर्त्ततेसदिक्शब्दःरमणीयादिद्यतिप्रसंगइतायथाहिपूर्वादयःशब्दाव्यवस्थानिमित्ता देशकालसाधारणाश्च
पियदादिशिवर्त्तते।तदादिक्शब्दइत्युच्यते।तथारमणीयादयोपिगुणानिमित्तादिशिवर्त्तनेनादिक्शब्दाःस्युःअत्रपरिहारउक्तः।दिशिदृष्टःशब्दोदिक्शब्द
दिशोयोनव्यभिचरतीति।तत्रदेशकालयोरपिव्यवस्थाशब्दःपूर्वादियोवर्त्ततेतथाचाभेदेनदिक्शब्देभ्योदिग्देशकालेषुवर्त्तमानेभ्यइत्युच्यतइति।कथं
दिशंयोनव्यभिचरन्तीत्युक्तमेतद्व्याख्यसमर्थयितुमाह॥ ॥दिक्शब्दैरभिधानेतुनियतदिशिवःदर्शनं॥पूर्वादीनांयथाषष्ठीवितस्यावधारणे॥१७॥ ॥श
क्रियाग्रहणेनतत्राथतिरानपेक्षारूढापूर्वादिशब्दानांप्रवृत्तिः।देशकालयोस्तुतदुपाधिनिमित्तेतिसूचयति।तथाचनियतमव्यभिचारिदिशिदर्शनंपूर्वा
दिशब्दानांप्रयोगः।देशकालयोस्तुव्यवस्थानिमित्तत्वेनरूढःप्रयोगः।पूर्वादिशित्युक्तेनामधेयत्वेननिश्चिता।अवधिभावारूढप्रतीतिःपूर्वोयंदृष्टोदु
तइत्यवश्यमपेक्ष्यते।रूढशब्दाच्चस्वार्थेवाग्म्यतेतदुपरिव्यवस्थागम्यति।पूर्वशब्देनतुतस्यानामधेयंतथाचदिक्शब्देभ्योदेशकालशब्दानामेषां भ
वतिभेदएव।सादृश्याच्चैकत्वाध्यवसायः।नहिरूढीनांनैमित्तिकैःसहभेदःसंभवति।तथाचदिक्शब्देभ्योदिग्देशकालेष्वित्यत्रपूर्वादिशब्दानांकालभा
क्तेनविवक्षितत्वात्।शब्दग्रहणंसामान्यादिक्शब्दवशब्देयेषामिति।देशकालवृत्तयोरूपसाम्याद्विशिष्यंते।सदृशानांचशब्दानांकचिद्विषयेस्वभा
वान्नियमेनशक्तिर्दृश्यते।तद्यथा।षष्टिभूतःषष्टिकइति।ङीवितपरिमाणेप्रतिपाद्येनियमेनकालवाचीनियमेन।संख्याशब्देषष्टिशब्दःतथाचकालाधि
कारविहितप्रत्ययमुत्पादयति।तमधीष्टोभृतोभावीति।वृत्तिविषयेषष्टिशब्दोवाक्येसंख्याशब्देपिनियतकालसंख्येयमुपादत्ते।शब्दशक्तिप्रतिनियमा
श्रयेतिदिशब्दाद्वर्षाख्यएवकालोऽब्दमनःपरिमाणंप्रतीयतेनचवृत्तौकालवचनःप्रयुज्यते।येनतत्सामानाधिकरण्यात्कालवृत्तित्वंसंख्याशब्दानामपिघटती
येतेतिमासादिशब्दवत्यदांतरानपेक्षःकालोयंवर्षाख्येरूढः।तथाचतदस्यपरिमाणमित्यत्रङीवितपरिमाणेचेत्यनर्थकंवचनं।कालादितिसिद्धत्वाद्।

DR BHAU DAJI

त्युक्तंयोहिषष्टवर्षाणांभूतस्तस्यषष्टीवितपरिमाणंभवत्येवेत्युपसंख्यानेननार्थःनचैवंरमणीयादिद्यतिप्रसंगःतेषांकालेनियतत्वस्याप्रतीतेः।प्रयु
क्तानांचेदमन्याख्यानमिति।लौकिकाप्रतीतिरनुसर्त्तव्या।तथाचोक्तमनभिधानाद्रमणीयादिषूत्पत्तिर्नभविष्यतीति।तदेवंयथाषष्टिशब्दःसंख्याशब्दःसंख्येय
विषयोप्यवस्तुस्वभावात्कालेरूढः।तथाहिपूर्वादिशब्दोन्यत्रदेशकालेचव्यवस्थावचनोपिदिशिस्वभावान्नियमेनरूढइतियुक्तमुक्तं।दिशंयोनव्यभिचरतीत्यर्थः
इत्यचदिशिनियतत्वात्प्रयोगस्यसमानायामाकृतौभाषितपुंस्कस्यपुंवद्भावात्सर्वनाम्नीवृत्तिमात्रइत्युक्तं।व्यवस्थायामसंज्ञायामितितुसर्वनामसंज्ञायामक
धिनियमानुगमाद्दिग्देशकालवचनाश्चापिपूर्वादयोविशेषणविशेष्यतेतथाहि।अभिधानायप्रतिपादितरूपावच्छेदःपूर्वादित्वंतस्यानुगमोस्ति।देशकाला
योरविद्युव्यवस्थितार्थाभिधायित्वानात्पूर्वशब्दोत्रावधिभिन्नमेवावस्थितंदिशमाह।अवधिरुपाधित्वेनस्पृशति।यथाशोणितशब्दोलोहितएवार्थेवर्त्त
ते।अथलोहित्यप्रवृत्तिर्निमित्तवत्त्वेनयानापेक्षतेहस्वशब्दश्चभगवतिवासुदेववर्त्ततेनचहस्वगुणनिमित्तत्वेनोपादत्तेतद्वित्यमतभावितावधयोदिक्
शब्दाःपूर्वादयोरूढाःदेशकालयोस्तुशब्दोपात्तावधपेक्षइत्येतावान्विशेषः।अवधिनियमसुसमानइत्यविव्यवस्थायामित्यपिविशेषणेदिग्वाचिनांपूर्व
दीनांसर्वनामसंज्ञाकार्यंप्रवर्त्ततएवेदानींकार्यांतरमपिदिशःआह॥ ॥छायोद्भाभ्यांनगादीनांभागभेदःप्रकल्प्यते।।त्रैतद्धर्मस्वभावेषुभागभेदोनकल्प
त्यते॥१९॥ ॥छायानिरालोकत्वात्।आभाश्चालोकः।दिनकरकररञ्जितःपर्वतशिखरएकोऽञ्जनछायाहरितश्चापरइत्यवयवविभागश्छायातापाभ्या
मुपलक्षितोसत्यांदिशिनकल्प्येतापूर्वापरावधित्वाभावात्।तदुपाधिकावयवानानात्वायोगात्।तथाह्यविद्यमानःसदिगुपाधिकोधर्मःपूर्वापरादित्वंये
षामूर्त्तिमत्पदार्थानामर्यादातेष्वेवसंविधयावयवभेदाभावइतिदिक्संबंधनिमित्तोवयवभेदोपिदिङ्गमित्यर्थः।तथाहि।मूर्त्तीनांप्रथमतएवभा
गभेदकल्पनदिगायत्तमित्याह॥ ॥परमाणोरभागस्यदिशाभागोविधीयते॥भागप्रकल्पनाशक्तिंप्रमातापश्चरुते॥२०॥ ॥अकृतकृतवान्नित्यो

नांपरमाणुनांपार्श्वचतुष्टयमूर्ध्वाधोभागरूपंचादिशापरिकल्प्यतेनहिपरमाणोरभागस्यवास्तवोभेदभागइतदिशाहृतएवसः।तथाचतत्रस्थैःषड्भिःपरमाणुभि-
र्योगोभवति।सतितुयोगेद्व्यणुकादिक्रमेणकार्यंजायतेततश्चतत्रापिपूर्वापरादिव्यवहारएवसः।अस्त्यंतुदिशिषड्भियोगेरपिनिरवयवस्यपिंडःस्यादणु
मात्रकइति।स्थूलावयववत्त्वन्निमित्तंस्यात्।तस्मादुन्नतिप्रभृतिभागसमारोपेप्रथमादिशातामेवशक्तिरितिदिग्भिःसर्वेपदार्थामूर्त्तमूर्त्तभागभेदप्रकल्पने
नोपक्रियंते।अन्येषांनभआदीनांछायातपादभ्यांभागभेदःप्रकल्प्यते।येषांतुनिरवयवानांछायातपनिमित्तःसनभवति।तेषांपरमाणुप्रभृतिदिङ्निमित्तइति।
व्याचक्षते।तथाहि।यत्रनिमित्तांतरंनास्तितत्रातद्धर्मसुनिरवयवेषुदिशाव्यापारः।यत्रत्वन्यन्निमित्तमस्ति।भागभेदस्यछायापकंछायातपादीदिक्कंसावयवान
नांपर्वतादीनां।तत्रतदेवभागभेदव्यवहारप्रवर्त्तकं।एतत्प्रथमश्लोकेनोक्तं।द्वितीयापारस्तुद्वितीयश्लोकेनकथितःतथाहि।यतोनिरवयवत्वाच्छायादित्वकोभा
गभेदप्रकल्पकोतोनात्रपरमाणोर्दिशादिकृपदार्थेनभागोभिधीयते।भागव्यवहारःपूर्वादिकःप्रवर्त्ततइत्यर्थः।यदिवायथाहेत्वंतरेकृतोभागभेदोव्यवहारःप-
र्वतादिषुपरमाणुष्वपिछायातपसंयोगविविक्तेषुनिमित्तांतरमेषणीयं।तच्चदिगितिस्वदृष्टांतोपन्यासोयमाद्यकारिकयाकृतइत्यपरेव्याचक्षते।तदेतत्सर्व-
मतुपपन्नं।तथाहि।घटस्यैकस्मिन्पार्श्वेसूर्यरश्मयःपतंति।तेतद्देशस्थैःकपालैरेवसंबध्यंते।तदन्यपार्श्वेचछायायाकपालानामेवसंयोगइति।घटस्यछायातपाभ्याम
संबधः।अथतद्देशत्वात्सन्निहितमवयविद्रव्यमपिसंबध्यते।तदाभिन्नदेशत्वमवयवावयविनोःस्यात्।अतपेनसंयुक्तत्वादसंयुक्तत्वादवयवोपिवावयवीति
तत्रापिछायादिसंबंधेवयवादिसंज्ञामेवानेनन्यायेनातन्त्राप्यवयवांतरेणाभिन्नमितिपरमाणुपर्यंतता।ततश्चदिक्संबंधादेवपरमाणुवत्स्थूलोपिपदार्थः।
पूर्वापरादिभागव्यपदेशमुन्नतीचत्वादिकंचप्रतिपद्यते।तथाचनिर्भागात्मकतातुल्यापरमाणोर्घटस्यचेत्यादिवक्ष्यत्येव।नतुस्वतएवपदार्थाविशिष्टसं
स्थानाः।कएषांतत्कृतःप्रकारइत्याशंक्याह॥ ॥अदेशाश्चाप्यभागाश्चनिष्क्रमानिरुपाश्रयाः॥भावाःसंसर्गिरूपानुशक्तिभेदःप्रकल्प्यते॥१३॥ ॥विभूना।

७६

माकाशादीनांनास्तिदेशःपृथिव्यादीनांतुमूर्त्तानामवयवानामात्मभूतदेशाभावःउभयेषामप्यकल्पितादेशाःसयोगिनःसमवायिनश्चाएवंस्वतः
पदार्थानामवयवानसंति।कल्पितास्त्वर्थांतरभूताःससर्गिणः।अवयवभेदाभावाच्च।क्रमोप्यमुख्यभेदाधिष्ठानत्वात्क्रमस्यतथाअविद्यमानउपा-
श्रयस्वभावोन्यथात्वापादकोयेषांतेनिरुपाश्रयाः।एवरूपाश्चभूताश्चयेचभावाःससर्गरूपोपहितेनशक्तिभेदेनअसत्यपिस्वरूपान्यथात्वेदेशादिभे-
देनप्रतीयंतेतथाह्यपरस्मादिशायोगात्संबंधविशेषेपिकश्चिदाधारतामात्रोदेशइतिदिङ्निमित्तोदेशव्यवहारः।सएवचदेशसमवायवशेनेतिरोहि
तभेदइतिविभागोवयवभेदश्चेत्यपिव्यवक्रियंते।नहृशेनचक्रमेणोत्पत्तेःक्रमावभासः।गुणादिभिश्चसमुदायाद्देशोहेसतिविशिष्टार्थविसायइ
तिससर्गिनिमित्तोभावानांव्यवहारः।आत्मातुतेषांतत्रयोगस्वभावः।तदेवयथादेशादिकार्यमदेशाद्याश्रयिभावाःससर्गिभेदात्प्रतिपद्यते।तथा।
दिशासंपादितपूर्वभागात्पूर्वादिभागःभेदव्यवहारप्रतिपाद्यतइतिदृष्टांतोपन्यासेनसमर्थितं।नतुदेशभेदभिन्नःप्रतीयमानावयवीमहापरिमा
णोघटादिरवयवीदृश्येत।कथंतत्रदेशताद्युपपद्येतेत्याशंक्याह॥ ॥निर्भागात्मकतातुल्यापरमाणोर्घटस्यच॥भागःशक्त्यंतरंयच्चपरिमाणंच।
यच्चनयोः॥१४॥ ॥स्वभावभूतान्वयशून्यतायाघटपरमाण्वोःसमानायादिग्रहणेनतुशक्तिविशेषेणकल्पितयोर्विपर्यासाधारभूतएवसमवा
यवशादविवेकेनभासमानाशक्तिर्निमित्तत्वात्।शक्तिव्यपदेश्याभागाइतिव्यवक्रियंते।स्वतोभागनिमित्तेएकत्वायोगात्।अर्थांतरनिमित्ताचभा
गवत्तामुख्यापरमाणोरपिप्रसंगात्।नचापिपरमाणुकृतोमुख्योभागभेदः।परिमाणस्यापितयोर्घटपरमाण्वोर्महत्वाणुत्वलक्षणस्यभावादर्थां
तरत्वात्।महदणुप्रत्ययहेतुर्हिशक्तिविशेषःपरिमाणं।अतएवपरिमाणविशेषात्घटाणुवोविशेषोनत्ववयवसंबंधसंबंधभ्यांनियुताधिसंबंध
नपेक्षायांमव्यपदेश्यंवस्तुकल्पनंसर्वसमानं।सचापिवस्तूनामुपाधिनिहितोभेदःस्वरूपसमवायीत्याह॥ ॥यतःप्रकल्पितोभेदोभेदस्तत्रापिद

श्यते॥ अदृष्टोपरतभेदमतोयुक्ततरंवइः॥१४॥ ॥अवयवैरवयविनोभेदः॥अवयवानामपस्थावयवैस्तेषामपस्थावयवैरेवेतियावत्परमाणुपर्यंतप्रतिः॥तत्रापिदिशोभागभेदप्रकल्पनंदिग्धीनाश्रितभेदात्॥कथंभेदायोपकल्प्येत॥दिग्भेदोपिसूर्यसंयोगाहितः॥तेनापिसूर्यसंयोगोभेदप्रदेशात्॥तत्रायवयवभेदाद्भेदः॥तत्रायवयवदृष्टिरितिपुनर्दिग्भेदावस्थानं॥तत्रापेक्षमितिचकृतुल्यमिदंअत्यदृष्टपुपरतिर्निष्ठायस्याभेदस्यतमनवस्थादोषादतिशयेनानुपपातमन्यते॥नकेवलस्ततोभेदोयुक्तोभावानां॥यावदुपाधीनामप्यन्यापेक्षणादर्थपर्यवसितोभेदः॥सुतरांभावभेदेनालमितिप्रकर्षः॥तदेवंतद्देशादिभेदस्यभावेषुस्वतस्तदुपाधिवशाच्चाप्ययोगाद्व्यवहारमात्रंसांदृष्टेनरूपेणप्रसूदमशक्यापह्नवमितिनिगमयति॥चैतन्यवदित्यादिनासंप्रतिव्यापकत्वेदिशःप्राह॥ ॥सर्वत्रतस्यकार्यस्यदर्शनाद्विभुरिष्यते॥विभुत्वमेतदेवाङ्गारन्यःकार्यवतांविधिः॥१५॥ ॥व्यतिरेकादेःपूर्वोदितस्यकार्यस्यसार्वत्रिकत्वात्॥व्यापिनीदिग्विभुस्वभावा॥अमूर्त्तानांह्येतदेवविभुत्वं॥सर्वत्रस्वकार्यसंपादकत्वं॥मूर्त्तानांतुशरीरिणामवयवैर्वेवितनदेशव्यापिर्विभुत्वं॥इदानींपूर्वोक्तंनिगमयति॥ ॥चैतन्येवस्थितालोकेदिक्कालपरिकल्पना॥प्रकृतिप्रत्ययानांहिकोन्यथास्थापयिष्यति॥१६॥ ॥सन्नपिहिपदार्थोयावन्नसंवेद्यते॥तावदप्रामसतत्वइवनार्थक्रियासूपयुज्यतइतिचैतन्यज्ञानं॥सर्ववादिभिरशक्यनिह्नवं॥आत्मावाचैतन्यं॥यथाङ्गःसांख्याः॥चैतन्यपुरुषस्वरूपमितिं॥तच्चाशक्यापह्नवमिति॥तद्वदनुपपद्यमानभेदापिदिक्कालयोःपरिकल्पना॥यथाप्रतीतिसूत्रं॥भावानांहिपरमार्थतःपूर्वोक्तयेनभेदाभेदभावाभावादिरूपेणयोगादनादिरूढाविद्यावशाद्विचित्रोव्यवहारोरूढः॥प्रकृतिःस्वभावमिवव्यवहर्तृणांप्रामुष्टि॥विद्वद्भिरपितथातद्वेदिभिरन्यथाव्यवस्थापयितुंनपार्यते॥तथाहिचैतन्यंस्वभावभूतंएवंसर्वव्यवहाराणांपूर्वापरादित्वेनदिक्कालावपिरूढौ॥तावंतरेणार्थक्रियानिष्पद्यते॥प्राणित्वमेवविघटेतेतिप्राणिग्रहणेनसूचयति॥व्यवहारेचयथाप्रतीतिपदार्थप्रत्याख्यानंनयुज्यतेयस्मात्॥ ॥संकरोव्यवहाराणांप्रकृतःस्याद्विपर्यये॥तस्मान्यङ्गंतीमानभावान्पुनरेवा

वलंबते॥१७॥ ॥दृष्टादृष्टफलाव्यवहाराः॥प्राड्मुखोन्नानभुंजीत॥अपराह्णेप्राङ्कुर्यादित्यादयः॥प्रत्याख्यानेदिक्कालयोर्नविकल्पेरन्॥प्रकृतेस्वभावरूपतायांप्राणायांदिक्कालकल्पनाभावविपर्ययेवैपरीत्येपूर्वापरादिभिर्निमित्तत्वेनक्रियमाणेभिन्नीभावेनावस्थितत्वात्प्रत्यक्षागमसूदानासंधीयमानादिरूपाणांस्यात्॥तस्माद्यद्यपूर्वापरहींदंविश्वमूर्त्तितःक्रियावत्॥तथापिविद्वद्व्यवहारयतितस्यक्रमप्रपंचावभासोपितत्रप्रपंचमवलंबतएवेतीमान्दिक्कालप्रकाशानर्थान्बाधकाभासोपन्यासेननिराकुर्वन्नवलंबतेतदुपाधिप्रत्ययस्यानिवार्यत्वाद्वक्ष्यवचनेनावयवादिरप्यर्थोशक्यपरिहारोव्यवहारइतिदर्शयति॥यद्यन्नालंबनइति॥समानकालत्वेनत्यागावलंबनयोरतिशयोक्त्यायुगपद्विरुद्धाख्योर्थभ्युपगमात्परस्परस्ववचनविरोधंघनयति॥यथाचकालोब्रह्मणःशक्तिर्भवेत्युक्त्वाव्यापारोध्यस्तनानात्वात्॥तथादिगपिस्वोपाधिभिन्नापूर्वापरादीनभावभेदंविव्यवहारनिबंधिनीत्याह॥ ॥तस्याःशक्तेस्तुपूर्वादिभेदोभावांतराश्रयः॥भिन्नादिकृतेनभेदेनभेदोभावोयेवोपकल्प्यते॥१८॥ ॥सास्वैरूपाधिभिर्भिन्नेतिसामान्येनोक्तेपिपूर्वादितयाविशेषणरूपेणाभेदःपुनरिहायातः॥सूर्यसंयोगश्चभावांतराख्यातः॥भेदायैवेतिस्वविशेषणीपरकृतविशेष्यप्रत्ययजननायेत्यर्थः॥अनवधारणेनभिन्नविशेष्यकालप्रत्ययकालएवोपाधिकंभेदंसमवलंबतेतेनान्यदास्तेतोभिन्नादिगित्याह॥इदानींदिङ्निमित्तंशास्त्रेकार्यमाह॥ ॥अवधिर्वेनचापेक्षायोगोदिग्लक्षणोविधिः॥पूर्वमस्येतिषष्ठ्यावदृष्टार्थमंतराश्रये॥१९॥ ॥इदमस्मात्पूर्वंपरमितिमयादिरूपेणापेक्षणंलौकिकंकार्यंतत्रैवशास्त्रीयंदिग्योगलक्षणापंचमीविशेषविषयाकथंतर्हित्रैवषष्ठीदृश्यतइत्याह॥पूर्वस्येतिषष्ठ्यावदृश्यत्यादि॥अवध्यवधिमत्संबंधेपेक्षितेपंचमीतयाषष्ठी॥तत्रैवापवादत्वाद्व्यध्यतेधर्मतिरस्यावयवत्वस्यत्वपेक्षायामवयविनिषष्ठ्यवभवति॥पूर्वंकायस्येति॥नह्यत्रावधित्वेनावयवीपेक्ष्यतेदिग्योगपंचम्याश्चविषयोयंअवयवावयविसंबंधेहिनपंचमीकिंत्ववध्यवधिमत्संबंधे॥अतएवात्रावयवांतरापेक्षा॥अवयवांतरस्यावधित्वेभवत्येवपंचमी॥पूर्वं

कायस्यनाभेरिति।कायावयवयपेक्षयावयवता।अवयवांतरापेक्षयातुपूर्वेतिसंबंधभेदादवरोधेवभाक्त्वयोपपत्तिः।समासविधेयैकदेशत्वेत्यवयवपर
ग्रहेदिग्भूपतानाश्रीयते।व्यवहारेचपूर्वादिभावःपूर्वादिनिमित्तानांमथनिस्थानतस्वागनिमित्तइतिनानवस्थितइत्याह॥ ॥पूर्वादीनांविषयसोदृष्टश्चाव
ध्यसंकरे॥ऋङ्नेतदस्त्येतच्चलिंगंनव्यतिकीर्यते॥२७॥ ॥अवधेरपेक्षणीयस्यासंकरेअनियताभावेपूर्वादिनांविषयसोदृष्टइतिव्यवस्थितएवायव्यवहा
रः।तथाहियदपेक्षयपूर्वत्वंव्यवस्थीयते।नतदपेक्षयतस्यैवापरत्वमिति।परत्वापरत्वेदिक्कृतेनियते।एवमवश्यंवंशस्यऋङ्गुणाःस्पष्टमूलं।इत्येतदपिदिशो
लिंगंनव्यतिकीर्यते।अवधेरेवानपेक्षणात्।अवध्यपेक्षायाहिसांकर्यसंभावेनापि।अवधेरनवस्थितत्वात्।नचात्रलिंगेव्यवध्यपेक्षेत्यव्यतिकीर्णएवदिशः।इ
त्यत्रस्यागादपिव्यवस्थानेवधिनियमादसांकर्यमेवादृष्टादृष्टप्रयोजनसुव्यवहारोनादिसिद्धादित्यसंप्रयोगाख्यावधिर्निबंधनदिग्व्यवस्थानियतएवेषणी
यइतिनयः।कश्चनावधिराश्रयणीयः।एवतावद्बाह्यार्थनयेनदिक्समर्थिता।इदानींमतनयेनाह॥ ॥अतःकरणधर्मोवाबहिरेवप्रकाशते॥अस्यास्त्व
तर्बहिर्भविःक्रियायांचनविद्यते॥२९॥ ॥अंतरवस्थितस्यकरणव्यापारोयस्येतिचैतन्यमेवमुच्यते।तस्यहिनाद्यविद्यावशात्स्वरूपनिकर्षेणो।दभि।
ति।बहिराकारावभासेपिपरमार्थतोबाह्यस्यायोगात्।अंतरसंयोगावधिभावात्स्वभावेचेडगात्यवभासते।इत्यंतरव्यवस्थितस्यैवव्यापारः।तथाचवस्तु
ति।द्योःक्ष्मावायुरादित्यःसागराःसरितोदिशः।अतःकारणतत्वस्यभागाबहिरवस्थिताइति।अस्मात्करणधर्म्यधर्मोबाह्यार्थनियेक्षोविद्यावश
त्स्वभावभूतोवभासते।एवंपूर्वविद्याकारणबहिरध्यवसीयते।असतिबाह्येकथंबहिरित्युच्यतेइतिचेदाह।अस्यामविद्यावशादवभासस्यैवबाह्य
त्वावभासस्यैवंरूपायांकल्पनायांमसारूपतावहीरूपता।चनमुख्यापरापरप्रतिभासवशेनैवमुच्यतइत्यर्थः।असतिबाह्येतदपेक्षमांतरत्वमपिन ७८
तन्मुख्यमितिकाल्पनिकींतवहिर्भविः।एवंचपूर्वापरमप्यविद्याध्यस्तभावेप्रद्योत्यतारूपेणनादिमिथ्याभासवासनालक्षणादंतःकरणधर्मरूपच।

कास्तीतनबाह्याकाचेद्दृगस्तातत्रैकत्वनानात्वविचारोपिनिष्प्रयोजनइत्याह॥ ॥एकत्वमासांशक्तीनानानात्वंचैतत्कल्प्यते॥अवस्तुपतितेद्वात्वासत्यत
तोनपरामृशेत्॥२८॥ ॥नावोपाधिरूपाणांपूर्वादित्वेनभिन्नानांदिक्शक्तीनांमुख्यमेकत्वं।उपाधिभेदात्तुनानात्वं।मुख्यमेववाच्यनादिसिद्धंनानात्वं।भि
न्नकार्यानुमेयंइत्येतद्धिकल्प्यते।अवस्तुपतितेदृशःपरमार्थतोवस्तुत्वाद्विज्ञाननयेव्यतिरिक्तवस्त्वभावादित्यवस्तुविषयेवह्वापरमार्थतोनविचार
णीयेत्यर्थः।तथाप्रतीतिव्यवहारसिद्धेः।अतएवसंवेद्यमानप्रतीतिभेदान्नानात्वमभिप्रेत्यासामितिबहुत्वेननिर्देशः।नचपदार्थविचारेकिंचित्प्रयो
जनमस्तीतथाहि॥ ॥विकल्पातीततत्त्वेषुसंकेतोपनिबंधनाः॥बाह्येषुव्यवहारायलोकस्तत्रानुगम्यते॥३०॥ ॥इहपदार्थस्तीर्थितपरिकल्पिता
नियतसंकेतपरिघटितशरीरास्तांस्तीर्थिकैपरिकल्पितान्विकल्पानतिक्रम्यभावतोवर्त्ततेनहिप्रतिदर्शनविरुद्धरूपयोगस्तत्त्वभावानां।तस्माद्
विचारितरमणीयालोकसिद्धःपदार्थाःसमाश्रयणीयाविद्वद्भिरपि।अत्रलक्ष्मेभिरप्रतिष्ठितैस्तर्कविकल्पैः।तथाचलोकसिद्धादृशिदृशःसिद्धाः।तर्क
विकल्पैस्तुभेदाभेदौनव्यवतिष्ठेतेइत्याह॥ ॥नैकत्वमस्यनानात्वंविनैकत्वेननेतरत्॥परमार्थतोयोरेषभेदोत्यंतंनविद्यते॥३१॥ ॥अन्योन्यात्म
यरूपस्यैकासिद्धावितरासिद्धेतिरूपाधिप्रसंगइतिदिशामेकत्वनानात्वेनव्यवतिष्ठेते।व्यवहारेणाऽनिमीलनेनेतुयथावभासलौकिकोव्यवहा
रोरूढः।परमार्थविचारेतुपरस्परप्रतियोगिनोर्भेदाभेदयोरन्यतमतामुख्याभिन्नस्यपरस्यैवतत्त्वरूपतादित्यर्थः।किंतुपरोपाधितयाशक्तिर्द्विधे
त्युक्ताशक्तेश्चभेदाभेदविचारानर्हतेत्याह॥ ॥नशक्तीनांतथाभेदोयथाभेदोयथाशक्तिमतांस्थितः॥नचलौकिकमेकत्वंतासामात्मसुविद्यते॥३२॥॥
शक्तिमतांपदार्थानांदृष्टमेवावधारणाऽद्वैतेनिश्चीयते।नशक्तीनामाधारपारतंत्र्येणावभासमानानांतस्मादाधारतश्चत्यस्यरतश्चभेदःसिध्यत्यद
सिद्धः।नचापिस्वतंत्रस्यशक्तिमतोयथाभेदः।घटादेरेकत्वंलोकप्रसिद्धं।अभेदावभासात्।तथाशक्तीनांकार्यनानात्वेनीयमानभेदानांस्वतंत्रत्वा

धारा च भेदोस्त्येव। व्याप्यव्यापकतावच्छेदेन च अवयवावयविनोर्भेदोस्तीत्यानर्थक्यमाशङ्क्याह। एवं भेदाभेदाभ्यामवाः शक्तयः। अत एव विद्याशक्तिर्ब्रह्मणो भेदं विधत्ते। येनाद्वैतापत्तिः। यदुक्तं नैकत्वमस्य नानात्वमित्यादि। एतदेवाव्यवस्थितत्वेन निगमयंस्तार्किकाणामेकपक्षावलंबनं नयन्नाह॥ ॥नैकत्वं व्यवतिष्ठेत नानात्वं चेन्न कल्प्येत्॥ नानात्वं चापह्नीयेत यद्येकत्वं न कल्प्येत्॥२६॥ ॥यतियोगिभूतं नानात्वं यदि बुद्धान न कल्प्येत्। नाश्रयेत। एकत्वं कर्तृतदानस्वरूपं नियतं लभेत। एवं नानात्वमपि यदि प्रतियोग्येकत्वं नाश्रयेत। तदा तदपि नावतिष्ठेतेति परस्परापेक्षत्वादनयोर्नैकत्रावस्थातुं पार्यतइत्यविचारितरमणीयादिगाश्रयणीयालोकिकीतिसिद्धं॥२४॥ ॥इति भूतिराजतनयहेलाराजरूतेश्रीमद्भर्तृप्रकाशेदिक्समुद्देशः षष्ठः॥ ॥श्रीहरिर्जयति॥ दिशो नंतरसाधनमुद्दिष्टलक्षयितुमाह॥ ॥स्वाश्रयेसमवेतानांतद्देवाश्रयांतरे। क्रियाणामभिनिष्पत्तौसामर्थ्यसाधनंविदुः॥१॥ ॥क्रियाभिनिर्वृत्तौद्रव्यस्यशक्तिः साधनं। साध्यतेनयाक्रियेतिभाष्यकारप्रभृतयोविदुः। तथाहि। गुणाः साधनमितिभाष्येउक्ताः। शक्तिरेवात्रक्रियाद्रव्यादिपारतंत्र्यादन्यस्माच्चस्वाश्रयस्यभेदकत्वाद्गुणाशब्देनोक्ता। कदाख्याताभिहितयोर्गुणयोर्भेदाभिधानेनसंगोतुयज्ञाख्यं द्रव्यं क्रियानिर्वृत्तिंप्रतिसाधनभावमुपैतीति। तदन्यत्राह। द्रव्यस्यसाधनव्युदासाच्छक्तिर्व्यवधानाश्रयेणगमयितव्या। शक्तिर्हिद्रव्यं साधनं। ननुनिराधाराशक्तिः संभवति। परोक्षेलिङित्यत्रापियदि गुणसमुदायः साधनं। साधनंसाध्यमन्यनुमानगम्यं। अथान्यद्गुणेभ्यः साधनं भवतिप्रत्यक्षपरोक्षतायाः संभवइतियज्ञाख्यं तच्चतवमतेनित्यशक्तेर्नित्यपरोक्षत्वात्क्रियावद्विशेषणमभिचारादयुक्तमितिपरोक्षताविशेषणसामर्थ्याच्छक्त्यापीष्टद्रव्यसाधनमुपन्यस्तं। एवमुपसर्गाच्छंदसिधात्वर्थइत्यत्रसाधनंयद्भवद्भिंगसंख्यायांयोक्ष्यतेनेतिभाष्यंसाधनशक्तिविशिष्टंद्रव्यइतिव्याख्येयं। तथाहि। यातावित्येवोक्तेरशिष्टत्वप्रत्ययासंभवात्। क्रियाप्रहणौसिद्धायामप्यर्थग्रहणाद्धातुरुक्तोर्थइतिप्रतिपत्त्यर्थंद्रव्यमाश्रितं। वस्तुपर्यायोप्यर्थशब्दः। द्रव्यस्यचस्वरूपेणासिद्धस्वभावत्वात्। क्रियायाः करणानुपपत्तेः। कर्मादिकारकरूपेणोवतस्

स्यकरणं क्रियाहंकारकाणि करोति। तदपेक्षत्वान्नद्रव्यव्यवहारस्येति। साधनमात्मानं द्रव्यस्यक्रियया कारणादेवमुक्तं। धात्वर्थः प्रयोजनमस्येत्येतत्तुभाष्येव्याख्यानमयुक्तं। एवंहिशक्तेरेवक्रियासाधनत्वेन प्रयोजनमिति। द्रव्यनप्रत्याय्येत। यत्तुसाधनवैद्रव्यं नचद्रव्यस्यप्रकर्षापकर्षौस्त इत्यद्रव्यप्रकर्षाव्याख्यानेभाष्येद्रव्यस्यसाधनत्वाभिधानं। तच्छक्तिशक्तिमतोर्भेदाविवक्षयेत्यवगंतव्यं। तथाहि। तिङंतात्साधनाभिधायिनः प्रकर्षेप्रकर्षप्रत्ययइतिशक्तेः क्रियालक्षणकार्यनिमेयायाः कार्यद्वारेणैवप्रकर्षइतिक्रियाप्रकर्षेप्रत्ययस्येष्टस्यसंग्रहेद्रव्याधारत्वाच्छक्तेः कार्यमुखेवकारणभूतद्रव्यमुखेनापि। कथंनप्रकर्षइत्याशंक्यद्रव्यस्यतदभावमभिधातुमेतदुक्तमिति। व्यतिरेकोनाहृतः। तत्रकर्तृकर्मणोः क्रियासमवेतीतिस्वाश्रयसमवेतक्रियानिष्पन्नौतयोः कारकता। करणादीनांतुपराश्रयसमवेतायाक्रियायासाधनभावः। नहिकरणादिषुक्रियासमवैति। क्रियाणमितिव्यक्तिभेदायेक्तंबद्धवचनं। गुणक्रियापेक्षयावा। स्वाश्रयसमवेतक्रियापेक्षंसाधनत्वं। गुणक्रियायांहिसर्वेकर्तारः। अकिंचित्करस्यसाधनत्वानुपपत्तेः। अत एवकरणकारकमित्यादि। साधनसामानाधिकरण्योपपत्तिः। द्रव्यंचक्रियाणमितिबद्धवचनमुद्गमितंभवति। कर्तृकरणस्थानुप्रधानक्रियाकरणादीनामाश्रयांतरसमवेता। कथपुनरेतदवगम्यतेशक्तिः साधनंनयुनर्द्रव्यमित्याह॥ ॥शक्तिमात्रसमूहस्यविश्वस्यानेकधर्मिणः॥ सर्वदासर्वथाभावात्कचित्किंचिद्विवक्ष्यते॥२॥ घटादयोभावाविश्वस्यवाच्याः। तेचतन्नद्रव्यारंभकावयवशक्तीनांसमूहरूपाः। अत एवताः शक्तयः। तत्रभागाइतिशक्तिसमाहारमात्रं घटादयः॥ ताश्चशक्तयोनेकविधाः। काश्चित्स्वहेतोरेवप्रभवंति। आश्रयविनाशमन्वपिचविनश्यंति। यथाबोधप्रदीपानांप्रकाशशक्तयः। काश्चित्पौरुषेयात्स्थिताएवाश्रयेनिरुध्यंते। यथाबलादिशक्तयः। ताहिसमाभ्यासेदृश्यद्रव्ययोगेनोच्चायंते। अन्याः सत्येवाश्रयेपुरुषप्रयत्नेनधार्यंते। यथाविषस्यमारणशक्तिः बीजस्याकुरजननशक्तिः। अन्याः प्रभावातिशयवताविपरिवर्तंते। यथायोगिनासर्वभावानांरूपपरिवृत्तिराश्रीयते। काश्चित्कालपरिवासेनव्यज्यंते

यथाधर्माधर्मशक्तिः फलदानइत्याद्यनेकविधमुन्नेयं।एवमनेकस्वभावत्वेशक्तसमुदायस्यवैचित्र्येकार्येयथाशक्तभेदविवक्षायांसतिनयतसाधनभावोपपत्तिः।इयंस्यतुसाधनत्वेतस्यैकरूपत्वात्कार्यवैचित्र्यनस्यादित्यर्थः।तदुक्तंभाष्ये।गुणसमुदायःसाधनमिति।प्रधानक्रियायाएकैकशक्तिसाध्यत्वाभावात्समुदायग्रहणं।गुणक्रियायेक्षयात्वेकंशक्तेःसाधनता।तस्याश्चप्रधानक्रियापेक्षयावैचित्र्यात्।कर्मादिरूपता।यद्वा।प्रत्येकंसाधनत्वेपिसमुदायग्रहणंशक्तीनांसाधनत्वेतासांभेदादेकस्यकार्यभेदोपपत्तिख्यापनार्थं।तेनानेकशक्तेरपिपदार्थस्यसदैवतथावस्थानेपिनकापिशक्तिःकाचिद्भूतावित्यवस्यतइति।घटंपश्यघटेनोदकमानयघटेउदकंनिधेहीत्यादिकर्मकरणादिभावोनियमेनोपपद्यतइतिनकारकसांकर्यप्रसंगः।व्यक्तेकत्वस्वभावात्कर्मकरणादित्वनोपपद्यतइतिगर्भीकृतेयमत्रयुक्तिः।शक्तेःसाधनत्वेनोद्भावनेनुचयत्रसतिशक्तयस्तत्रनियमेनविवक्षेरन्।यत्रपुनरसंत्यस्तत्रकथंतासांविवक्षा।तद्यथा।शक्तिमादधातिशक्त्यासाधयतिशक्त्यावायतते।शक्त्यावाव्येतीति।नहिशक्तेःशक्त्यंतरयोगः।अनवस्थापातात्।तथाधनविनाशकरोति।धनाभावेनयुक्तइतिनिरूपाख्येभावेकाशक्तिः।स्थाल्यांपचति।स्थाल्याःपचति।स्थालीपचतीतिचसंभवन्नुपकारास्थालीकरणाधिकरणाभिन्नाकथमित्याशंक्याह॥ ॥साधनव्यवहारश्चबुद्ध्यवस्थानिबंधनः॥सन्नसत्वार्थरूपेषुभेदोबुद्धाप्रकल्प्यते॥३॥

॥ ॥विवक्षारूपायाबुद्धेःशब्दनिर्भिन्नायेवस्थाविशेषाःप्रतिनियतशब्दनिबंधनाःतदाश्रयःकर्त्रादिकारकव्यवहारः।तथाहि।निरूपितेर्थेशब्दप्रयोगोद्यथानिरूपणंशब्दोपपत्तिर्निरूपणाच्चानपेक्ष्यापिबाह्यार्थस्वात्म्यात्यत्किल्पयंति।तास्तानर्थविशेषान्।तथाहि।सत्यपिवस्तुनियावद्बुद्धानिरूपणं।नास्तितावद्विषयःशब्दानामव्यवहार्यइतिव्यवहारबुद्धिरेवतत्प्रभवतीतिदृसन्निधिदर्शनगर्भमभिधानं।ततश्चशक्तेर्व्यायमाणायाबुद्धास्वात्मन्योनिरूपणाच्छब्देनाभिधानेशक्त्यंतरयोगोविरुद्धः।नहितदाशक्त्यावस्थायामेवतस्यांतद्योगोयेनानवस्थास्यात्।अपितुद्रव्यावस्थायामभावोपिबु

DR BHAU DAJI

द्धानिरूपताकारोद्व्यायमानएवशब्दावाच्यः।एवंतनुतरकपालत्वात्स्थालीपाकेनपेक्षितकर्त्रवियोगात्स्वतंत्र्येणविवक्षतइतिकर्त्रीइत्यनेनोपकारानपेक्षायाएतस्याएवसाधकत्वविवक्षायांतस्याएवसाधकतमत्वविवक्षायांतुकरणंवास्तवाधारविवक्षायांत्वधिकरणमितिसर्वमुपपद्यते।अतएवहंत्वात्मानमात्मनाआत्मनःस्वात्मन्यवस्थानमित्यादयःप्रयोगाःसाधवःवक्ष्यतिचैतत्।बुद्धैकंभिद्यतेभिन्नमेकत्वंचोपगच्छतीत्यादिदृश्यविकल्पयोरभेदाध्यवसायेनव्यवहारोपपत्तेः।बहिःसत्यादृन्निपरतयासमन्वयोत्रसमर्थनीयः।स्वात्मन्निनान्यस्मिन्।स्वात्मनएवनापरस्यावस्थानमित्यादि।यथाशिलापुत्रकस्यशरीरमिति।इत्यंचवाक्यादपोद्धृतस्यापिपदस्यसंस्कारेप्रथमतएवाप्रयुक्तेपदांतरेविवक्षितस्यापिविशेषस्यरूपसामान्यानवधारणीसंभवत्येवावाक्यावधिकमन्वाख्यानं।सावधिसामान्योपेक्षितेत्वन्यथाबुद्धानियतमर्थरूपक्रियादिसंबंधापेक्षंकृतंकथंनिरूप्येत।अनपेक्षितसंबंधरूपस्यार्थसामान्यस्याभावात्।अभ्युपगतेचपदावधिकमन्वाख्यानं।शास्त्रेतुधातुसंबंधेप्रत्याख्याइत्यादीनांप्रत्याख्यानात्।यत्रचसर्वथाचसंगतिः।स्थालीमोदनंपचतीत्यादौतद्वाक्यमेवनभवतीतिकथंवाक्यादपोद्धृतानांपदानामन्वानमत्रप्रसंगः।अतएवह्योणिमेदर्शनीयानीत्यादेर्विषयोगस्यनिहन्तयेशास्त्रसमर्थवदेवसामान्यमपिहिपदार्थरूपमर्थतिरसंसर्गयोग्यमेवहिसंस्क्रियते।नन्वंगुल्यग्रेकरिणाशतमास्इत्याद्यन्वितमेवाएवंचहत्वाचछंदसिचरूपाजयेत्यश्वयूपायतक्षतीत्यादावसाधुत्वाशंकापनुत्तयेव्यत्ययोर्थवानेवानियतानुपूर्वीकस्यछंदोवाक्यस्यसंभवात्।ततस्तदैवापोद्धारस्यन्याय्यत्वात्।लोकेतुनावस्थितेनियतानुपूर्वीकसंगतंवाक्यमिति।नततोपोद्धारप्रसंगः।तस्माद्वाक्यादपोद्धृत्यपदानुशासनेपिनिर्देष्यमेववापदावधिकमन्वाख्यानं।तत्रसमस्तविशेषणविशेष्टस्यार्थस्यांतरंगत्वादपोद्धारेसामान्यमात्रबुद्धिपरिकल्पितशरीरैरयुक्रमएवतुविशेषापेक्षायांवाक्यावधिकमन्वाख्यानंकथ्यते।ननुवाक्यस्थानंत्यात्सादन्वाख्यानंयुज्यते।प्रकृतिप्रत्ययादिविभागकल्पनयाहिपदस्येवानुशासनमुपपद्यते।व

स्यचकेवलस्यासंभवाद्धाक्यस्यतेसंबंधिसामान्यापेक्षायांपदावधिकांतद्धाक्योपात्तसंबंधिविशेषापेक्षायांतुवाक्यावधिकमन्वाख्यानंप्रतीयानन
योःपक्षयोर्विशेषःवोढेसाधनव्यवहारेभाष्यकाराभ्युपगमकसंवादमाह॥ ॥बुध्यासमीहितैकत्वात्पंचालान्कुरुभिर्यथा॥पुनर्विभक्तेवक्यांतदा
पायःप्रतीयते॥४॥ ॥कुरुभ्यःपंचालाश्चाभिरूपतराइतिपंचमीविभक्तिरितिसूत्रंभाष्येप्रत्याख्यातं।बौद्धस्यापादानस्यसंभवादपादानइत्येवसिद्धेःत
थाह्याभिरूप्येणसमानेनगुणेनकुरुभिःसहपंचालानांबुद्ध्यैकत्वंसमुदायभावमापाद्यचातिशयाभिरूपतावशात्कुरुभ्यःपंचालाःपृथक्क्रियंते।इत
त्यस्मिन्संश्लेषपूर्वकोविश्लेषोपायःतदुक्तंभाष्येयस्तैःसहसाम्यंगतवान्सएवप्रयुक्तइतितैःकुरुभिःसहपंचालानांसामर्थ्यसंप्रधारणासामर्थ्यादि
तिचाभिरूप्येणप्रथमयोक्ताख्यातवानित्यर्थः।अनेकबुद्धिनिवेशितेनकुरुपांचालानादेशप्रत्यासत्तिमाहभाष्यकारः।तत्पूर्वकस्तुसातिशयस्य।
निरतिशयाद्विभागः।पंचमीशब्दोपादानः।सुज्ञानत्वान्नोक्तोभाष्यकृतासूत्रारंभवादिनापिनिर्द्धारणेअयंनेषांबुद्ध्यैवसमुदायापायेसमानगु
णत्वादन्ययाणीयः।अन्यथानिर्द्धारणाधिकारादेवभागेलब्धेविभक्तग्रहणादत्यंतभागप्रतीतौनवास्तवःसमुदायभावोयुज्येत।तदेवंबोधःसाध
नभावोस्माद्वसीयते।कारकप्रकरणेचतमग्रहणात्प्रकर्षेनविवक्षितइतिगौणेप्यत्रापायोपादानसंज्ञोभवति।अन्यदपिभाष्योक्तंसंवादमाह॥
॥ ॥शब्दोपहितरूपांस्तुबुद्धेर्विषयतांगतान्।प्रत्यक्षमिवकंसादीन्साधनत्वेनमन्यते॥५॥ ॥हेतुमतिचेत्यत्रआख्यानात्कृतस्तद्राचष्टइत्युपसंख्या
नंनवासामान्यकृतत्वाद्धेतोर्हिविशिष्टमितिप्रत्याख्यातं।चित्रगुप्तादीहिप्रकृतिरूपस्यप्रयोज्यप्रयोजकभावाध्यवसायात्।कंसंघातयतिबलिं
बंधयतीतिसिद्धेएवकृतानुकरणेनाद्यापिनटानांकंसवासुदेवानुकारेणसादृश्यान्नटूपतोपपत्तिः।तत्रग्रथिकेषुकथमितिचोदितं।तत्रग्रथकाः।
कथकाइतिवृत्तिरूपेणोवकंसबंधाद्युपलक्ष्यते।तत्रचप्रकृतिरूपस्याभावात्कथंप्रयोज्यप्रयोजकत्वमितिपर्यनुयोगः।तत्रपरिहारउक्तः।तेपिहि

तेषामुत्पत्तिमभप्रभृत्यावनाशात्तद्रूढीर्व्यवच्छिन्नाःसंतोबुद्धिविषयान्प्रकाशयंतीति।चिरकालातीतत्वात्कंसादीनांबहिरसत्वाबुद्धिगोचरमवभासयंतोव्यव
हार्यमाणान्प्रकाशयंतिशब्दैनावभासयंतिबुद्धिप्रतिभासरूपेवप्रकारःशब्दार्थेनिवेश्यर्थः।तथावक्ष्यकः।श्रोत्रेरिकसाद्याकारऊष्मत्वयऊननात्।बुद्धिर्वसु
देवेनकंसयुधिकंसंघातयतीति।प्रयोज्यकत्वसमारोपात्प्रयोगोपपत्तिः।तथाहि।कथकोदीरितशब्दसामर्थ्यात्पिंडात्तरूपविशेषात्श्रोत्रबुद्धिगोचरमा
पन्नान्यव्यापाररूपान्कंसादीन्कर्मादीन्साधनतयाभाष्यकारोमन्यतइतिवृद्धव्यवस्थानिबंधनःसाधनव्यवहारःसिद्धः।गौणेपिचेहप्रयोगेकारकप्रकरणेप्रक
र्षनिश्रयाद्धेतुसंज्ञायांतद्व्यापारेचत्रीणिसूत्राणि।प्रत्यक्षमित्यव्ययीभावः।मननक्रियार्थविशेषणंचैतत्।इंद्रियनिमित्तेनज्ञानेनैवपरिस्फुटानवधार
यतीत्यर्थः।एतच्चरूढीर्व्यवच्छिन्नाइतिभाष्यस्याभिप्रायव्याख्यानं।प्रभावातिशययुक्तेवस्त्युत्कर्षवशात्स्पष्टरूपःप्रत्ययःप्रसूयतेस्पष्टंचज्ञानेचभा
समानेत्याकारोबाह्यात्मकोवसीयतेतदेवबुद्ध्यासाधनव्यवहारोपपन्नावेकस्यापिवस्तुनःशक्तिनानात्वबोधउपपद्यतइतिनिगमयति॥ ॥बुद्धिप्रवृत्ति
रूपंचसमारोप्याभिधत्तेभिः॥अर्थेषुशक्तिभेदानांक्रियतेपरिकल्पना॥६॥ ॥वृद्धेःप्रवृत्तिर्व्यापारःपरिच्छेदलक्षणः।तस्यारूपमाकारोविषयः।आभा
समानमर्थेषुबाह्येष्वध्यस्यतेषांशक्तिनानात्वंपरिकल्प्यतेवक्तृभिरयमर्थः।दृश्यविकल्पयोरभेदाध्यवसायात्बौद्धःशक्तिभेदोबाह्यएवेत्यभिमानान्नत्रवि
चित्रंसाधनभावमभिमन्यतेबुद्धिप्रतिभासस्यसुप्रतिष्ठत्वेनानात्वावगमात्।तत्रक्रियाभेदप्रतिबद्धव्यापेक्षांचानुवर्त्यवस्त्वेवनानाशक्तिकमवगम्यतइति
बहिरर्थेशब्दःप्रमाणं।क्रियाकारकसंसर्गस्यबाधकाभावात्।सतिसंवादेचवाक्यस्यप्रामाण्यमवगमयति।व्यवहर्तारःसौगतानांतुविकल्पप्रतिबिंब
स्यभेदानध्यवसायात्।बहिःप्रतीतिःप्रामाण्यंतुवक्तृभिरभिप्रायएवशब्दानांनाबाह्येष्वभिचारशंकनात्।अन्यव्यावृत्तिमात्रनिर्द्दिष्टानांतुबहिःवैयाकरणा
नांतद्व्यावृत्तवस्तुविषयतातथाध्यवसायान्नत्रैवचप्रामाण्यमितिदर्शनभेदः।नियतोपाधिनियमान्त्वत्रनसांकर्य्यउपकारिकाश्चशक्तयःप्रत्युपाधिभिः

संमूर्छितशरीरत्वाद्वस्तुतत्त्वतत्त्वाभ्यामनवबोधोऽतिनानोपाध्युपकारांगत्वादेरप्रसंगः॥बुद्ध्यवस्थासमाश्रयेणसाधनभावेसतइदमपिसद्भवतीत्याह॥
॥ ॥यत्नोपदार्थैश्शष्टादेर्ज्ञन्यमानस्यकर्मणः॥साधनत्वंतथासिद्धंबुद्धिरूपाप्रकल्पितं॥७॥ ॥ज्ञातौपदार्थैतज्ज्ञातीयाभेदेनानागतनिरूप्ययोग्य-
साधनविनियोगाज्ज्ञातिद्वारेणक्रियासिद्धावगतौव्यक्तिद्वारेणतुनिर्वर्त्यमानताकर्मणोयुज्यतइत्युक्तं।निर्वर्त्यमानयत्कर्मजातिस्तत्रापिसाधनमि-
तिव्यक्तोतुपदेनप्रत्याय्याशष्टइत्यनयति।सयोगंकरोतीत्यादौज्न्यमानस्यनिर्वर्त्यस्यशष्टादेतत्कर्मणोनागतस्यापिवर्त्तमानसारूप्यादसत्यपिज्ञातेः
प्रत्यायनेभेदानध्यवसायात्।बुद्ध्याकारमुल्लिख्ययोग्यसाधनविनियोगात्।बोद्धृस्थेवबहीरूपताध्यवसायात्।बाह्येनरूपेणानिर्वर्त्यमानता।वोद्धृन
तुसाधनभावोयुज्यतइत्यर्थः।ज्न्यमानस्येत्यनविकार्यप्राप्ययोर्यविच्छेदः।विकार्यहिप्रकृतिरूपेणास्थितमेव।प्राप्यमपिसतएवक्रियाबुद्धानाध्यारो
प्यतइत्याह॥ ॥स्वतत्त्वपरतंत्रत्वेक्रमरूपंचदर्शितं॥निरीहेष्वपिभावेषुकल्पनोपनिबंधनम्॥७॥ ॥सदसत्यरूपभेदेनकार्यकारणभावस्यनि-
राकृतत्वात्सर्वेभावाःक्रियारहिताश्चेष्टाशून्याःतत्रक्रियायांस्वातंत्र्यपारतंत्र्यादिलक्षणाकर्तृकरणादिरूपकारकत्वं।क्रियारूपमेवचापक्रमत्वं।
